[15] इति परिक्रम्योपविशन्ति K परिक्रम्योपविशन्ति Mt, Mg, $T_1$, $T_2$ सर्वे परिक्रम्योपविशन्ति Bo इति सर्वे परिक्रम्योपविशन्ति W, Sc परिक्रम्योपविशन्ति om Cu, E, $I_1$, Md, $I_2$

नेपथ्ये। जय जय जगत्पते रामचन्द्र जय ॥[2] सर्वे साश्चर्यम् ॥

राजा। भगवन्[4] का पुनरियं देवता ॥

विश्वा°। अस्त्यहल्या[5] नाम गौतमस्य[6] महर्षेरौतथ्यस्य[7] धर्मपत्नी यस्याः[8] शतानन्द आङ्गिरसोऽजायत। तामिन्द्रश्चकमे। तस्मात् तं[9] गौतमदारावस्कन्दिनमहल्याजार[10] इति[11] निर्दिशन्ति[12] [13] [14]। अथ भगवान्[16] मन्युमाप[17]। तस्यां पाप्मानमन्धतामिस्रमभ्यध्यायत[18]। सेयमद्य[19] रामभद्रतेजसा तस्मादेनसो निरमुच्यत[20] ॥

राजा। कथमप्रमेयसहजानुभावसामर्थ्य[21] एष[22] वत्सो[23] वैकर्तन-कुमारः[24] ॥

---

[1] रामचन्द्र $T_1$, $T_2$ जय cett

[2] सत्यं सूर्या[illegible] add Bo only

[3] सकौतुक° $T_2$ साद्भुत cett (+ $T_1$)

[4] भगवन् om $T_1$, $T_2$ only [(+ $T_2$)

[5] अस्ति om $T_1$ अस्ति cett

[6] गौतमस्य $K_1$, Bo, W, Sc, Cu, E, Mt, Mg गोतमस्य $I_1$, $I_2$, Md, $T_1$.

[7] महर्षेरौतथ्यस्य K, Bo, W, Sc, $I_2$ वैयथ्यस्य corr. to रौतथ्यस्य Cu महर्षेः रौतथ्यस्य E महर्षेरौतथ्यस्य मुनेः Md महर्षेरौचथ्यस्य $I_1$, Mg महर्षेरावित्थस्य Mt महर्षेराचार्यस्य $T_1$

[8] यस्यां $T_1$, $T_2$ यस्याः cett.

[9] तं om. E, $T_1$, $T_2$ only.

[10] गोतम $I_1$, $I_2$ गौतम cett. [Md only

[11] °वलम्बिन° changed to °वस्कन्दिन°

[12] Probably adds तं before अहल्या° E

[13] °ल्यायै जार $T_1$, $T_2$ °ल्याजार cett.

[14] जानन्ति Mt, $T_1$, $T_2$ निर्दिशति W, $I_2$ निर्दिशन्ति cett.

[15] तथा $T_1$, $T_2$ अथ cett.

[16] स add E, K only.

[17] मन्युमाप changed to मन्युना Sc मन्युमवाप्य Mt मन्युमवाप $T_1$, $T_2$ मन्युमाप cett (+ Md) [$T_1$, $T_2$ तस्यां cett

[18] तस्याः Cu, K, Mt तस्यो E तस्या

[19] पत्न्याम° W, Sc शरीरम° Mt पाप्मानम° cett

[20] °तामिस्र° $I_1$, Bo, Mg, $T_1$, $T_2$, $W_1$ °तामिश्र° Cu, K, E, Sc, Md, $I_2$, Mt

[21] °मभ्यधात् Cu, K °मभ्यधात् Mt °मभ्यधाय Bo °मभ्यधायत cett

[22] तदद्य $T_2$ सेयमद्य cett. (+ $T_1$).

[23] °सहजानुभाव° K, Mt, Mg, $T_1$, $T_2$ °सहगानुभाव° E °सहजानुव° corr. to °सहजानुपम° by revisor, Cu °सहजानुपम° cett. (+ Md)

[24] °सामर्थ्यसार T, $T_2$ °सामर्थ्य cett.

[25] एष om. $T_2$ only.

[26] वत्सो om. $T_1$ only. वत्सो cett (+ $T_2$).

[27] वैकर्तनः कुमारः E वैकर्तनकुलकुमारः Cu (corr. fr. वैकर्तनकुमारः) K वैकर्तनकुलकुमारः Bo विकर्तनकुलकुमारः $T_1$, $T_2$ वैकर्तनकुमारः cett.

सीता । सस्नेहानुरागं[1] निर्वर्ण्यापवार्य च । [2]सरीरणिम्माणसरिसो णं[3] से [4]अणुहावो ॥[4a]

राजा । निश्वस्य[5] ।[6]

रामाय पुण्यमहसे सदृशाय सीता
दत्तैव दाशरथिचन्द्रमसेऽभविष्यत् ।
[7]आरोपणेन पणमप्रतिकार्यमार्य-[8]
स्त्रैयम्बकस्य धनुषो यदि नाकरिष्यत् ॥२७॥

प्रविश्य तापसः । [9]रावणपुरोहितः सर्वमायो नाम वृद्धराक्षसः प्राप्तः स किल[10] राजकार्यार्[11]हः पश्यति ॥

कञ्चे । हुं रक्खसो[12] ॥

कुमा° । [13]महत्कौतुकस्थानम् ।

राजविश्वामित्रौ । विमृश्य ।[14] आगच्छतु ॥ तापसो निष्क्रान्तः[15] ॥

---

[1] सस्नेहानुवधं E सविस्मयानुरागं Mg, $T_1$, $T_2$ सस्नेहानुरागं cett सस्नेहानुरागं निर्वर्ण्य om Mt

[2] सरीर° K, Bo, W, Sc, $T_1$ शरीर° $I_1$, E, Cu, $I_2$, Md.

[3] णुं E णं omit Bo, $T_1$, $T_2$ Read णं cett.

[4] अणुभीवोः E नुभावो Cu अणुहवो Mt अनुभावो Md अणुहावो K अणुभावो $I_1$, Bo, W, Sc, $I_2$, $T_1$

[4a] शरीरनिर्माणसदृशो नन्वस्यानुभावः adds *chāyā*, Sc.

[5] निःश्वस्य $I_1$, W, Sc, $I_2$ निश्वस्य K, E, Bo, Md, $T_1$ निश्वस्य changed to निःश्वस्य Cu.

[6] स्वः add. $T_1$, $T_2$ only.

[7] दाशर--मसे Bo चन्द्र om E As text, cett

[8] °मार्यत्र्यम्बक° changed to °मार्यत्रैयम्बकं Cu

[9] रावणस्य $T_1$, $T_2$ रावण° cett.

[10] अञ्जसा add Mt only

[11] °कार्यार्थ $T_1$ °कार्याद्दः cett (+ $T_2$)

[12] ङं राक्षसः add *chāyā*, Sc.

[13] °कमस्थानम् $T_2$ °कस्थानम् cett. (+ $T_1$)

[14] आः add. $I_1$, Sc, $I_2$, Md आ adds Bo आह add. $T_2$ only.

[15] तापसो निःक्रान्तः W, K, Md तापसो निष्क्रान्तः cett (+ Mt, Mg, $T_1$) तापसो निष्क्रान्तः om $T_2$

प्रविश्य राक्षसः ।[1 2]

मातामहेन प्रतिषिध्यमानः
स्वयङ्ग्रहान्माल्यवता[3] दशास्यः ।
अयोनिजां राजसुतां वरीतुं
मां प्राहिणोन्मैथिलराजधानीम्[4] ॥२८॥

दृष्टश्च तत्र यजमानः[5] स राजा । तद्वचनात् कौशिककुशध्वजावनुसृतोऽस्मि ॥ इति परिक्रामति[6] ॥

रामलक्ष्मणौ । सीतोर्मिले प्रति यथासङ्ख्यम्[7] । आत्मगतम्[8] । तत् किमियममृतवर्तिरिव[9] चक्षुराप्याययति ॥

सीतोर्मिले । तथैव तौ प्रति । किं[10]ति सज्जइ[11] इमस्सिं[12] लोअणाणन्दे[13] मे[14] दिट्ठी ॥[14a]

राक्ष° । उपेत्य[15] दृष्ट्वा[16] च । इयं साद्भुताकृतिः सीता । स्थाने देवस्य यत्नः[17] ।[18] ऋषे नमस्ते । [19]अप्यनामयं राज्ञः ॥

---

[1] राक्षसः add Cu, E, K only Had राक्षसः, but intended to omit, $T_1$.

[2] स्वगतम् add. Md only

[3] स्वयङ्गृहा° E स्वयंवरा° Mt स्वयङ्ग्रहा° cett

[4] °थिलीं° W °थिल° cett

[5] जरठः $T_1$ only यजमः cett (+ $T_2$)

[6] °मन्ति Bo °मति cett.

[7] यथासुखम् $T_1$ यथासङ्ख्यम् om E. यथासङ्ख्यम् cett (+ $T_2$)

[8] आगतं Cu आत्मगतं cett

[9] मे add Mt, $T_2$ only

[10] कि त्ति $I_1$, Cu, Sc कि ति W, Md, $T_1$ किं त्ति Bo किं ति Mt कि र्त्ति $I_2$ न्हिं त E किं त्ति K किं ति om Mg

[11] मज्जइ E मज्जदि $T_1$, $T_2$ सज्जइ cett.

[12] इमस्सिं $I_1$, K, $I_2$ इमोम्हि E हमिस्सिं $T_1$, $T_2$ इमस्सिं cett.

[13] लोअणाणन्दिनी E लोअणन्दिणि W, Sc लोअणन्दि $I_2$ लोअणाणन्दे cett

[14] मे om E only

[14a] किमिति सज्जत्यस्मिल्लोकनन्दिनि मे दृष्टिः add *chāyā*, Sc

[15] उपेत्य Mt उपस्त्य cett

[16] दृष्ट्वा K, Mt दृष्ट्वा च om. Cu, $T_1$, $T_2$ Read दृष्ट्वा च cett

[17] पत्नी W, Sc, $I_2$ यत्नः cett

[18] तौ प्रति add Bo प्रकाशम् add. Mt only.

[19] विश्वा° add Md, Mt विश्वा°। विहस्य add Mg विजय्यनामयं for अप्यनामयं E. As text, cett.

तौ। [1]स्वागतम्[2] । इहास्यताम् ॥

अपि प्रभोर्वः कुशलं तस्य यस्यार्चयत्यसौ ।
मूर्ध्ना स्खलत्किरीटेन शासनं पाकशासनः ॥ २७॥

राज्ञ°। उपेत्य[3]। [4]कुशलं स्वामिनः । सन्दिष्टं च वो महाराजेन ।

कन्यारत्नमयोनिजन्म भवतामास्ते वयं चार्थिनो
रत्नं चेत् क्वचिदस्ति तत्परिणमत्यस्मासु शक्रा[5]दपि ।
कन्यायाश्च[6] परार्थतैव हि मता तस्याः प्रदानादहं
बन्धुर्वो भविता[7] पुलस्त्यपुलहप्रष्ठा[8]श्च सम्बन्धिनः ॥ ३०॥

सीता। हद्धी[9] हद्धी रक्खसो[10][11] मं पत्थेदि[12] ॥[12a]

ऊर्मिला। हा[13] कहं एव्वम्[14] ॥[14a] राजर्षिस्वामिनौ [15]चिन्तयतः ॥

लक्ष्म°। जनान्तिकम्[16]। आर्य आर्य[17] किं न पश्यसि निशाचरपतिर्दे-
वीमिमां प्रार्थयते ॥

रामः। वत्स ।

साधारण्यान्निरातङ्कः[18] कन्यामन्योऽपि याचते ।
किं पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः ॥ ३१॥

---

[1] स्वागतौ add Bo only
[2] स्वर्गतम् E स्वागतम् cett
[3] उपविश्य Mt, $T_2$ उपेत्य cett
[4] सं स्वामिनः . . . . कन्याया om. $T_1$ only
[5] शक्रादिषु E शक्रादपि cett.
[6] °यास्तु E °याश्च cett
[7] भविता changed to भवता Md भविता cett. (+ Mt, Mg)
[8] °मश्च E °प्रष्ठाश्च cett
[9] हद्धी Cu, E, $I_2$, Sc, $T_1$ हद्धी२ $I_1$, Bo, W, Md हद्धि२ K.
[10] रक्खसो Cu रक्खसो cett
[11] एसो add E only.
[12] पत्थयदि $I_1$ पत्थएदि Md, Mt, Mg पत्थेति $T_1$, $T_2$ पत्थेदि cett
[12a] हा धिक् राक्षसो मां प्रार्थयति add *chāyā*, Sc. [Bo only.
[13] हा add. K, E, $T_1$, $T_2$ तदाहा add
[14] एवम् $I_1$ एवम् Bo एव्व Md, Mt, Mg एव्वम् cett.
[14a] कथमेवम् add *chāyā*, Sc
[15] विचिन्तयतः K, Cu चिंतितः Bo चिन्तयतम् E चिन्तयतः cett.
[16] जनान्तिकम् om $T_1$ जनान्तिकम् by revisor, Cu जनान्तिकम् cett. (+ $T_2$).
[17] आर्य E, W, $T_1$, $T_2$ आर्य२ cett.
[18] °रण्योनि° E °रण्यान्नि° cett

लक्ष्म०। आतिसौजन्यादार्यस्य[1] तस्मिन्नपि[2] निसर्गवैरिणि[3] निशाचरे[4] बहुमानः।

यो नस्त्रयीपरिध्वंसात् क्षात्रं तेजोऽपकर्षति[5]।
ऐक्ष्वाकं[6] यश्च राजर्षिमनरण्यं[7] किलावधीत्[8] ॥३२॥

रामः। शत्रुरिति[8] कामं वध्यः स्यान्न पुनरप्रमेयतपसमतिवीरमप्राकृतं[9][10][11][12] प्राकृतवदर्हसि व्यपदेष्टुम् ॥

लक्ष्म०। निरस्तवीरपुरुषाचारस्य[13][14] का तस्य[15] वीरता ॥

रामः। वत्स मा मैवम्।

यद्विद्वानपि तादृशेऽप्यभिजने धर्म्यात्पथो विच्युतः[16][17][18]
किं ब्रूमोऽत्र तदन्यदेव[19] न वसन्त्येकत्र सर्वे गुणाः।
लीलानिर्जितषण्मुखाद्भगवतः श्रीजामदग्न्यादृते[20]
निर्विघ्नप्रतिपन्नविश्वविजयो वीरस्तु कस्तादृशः[21] ॥३३॥

---

[1] अतीवसौजन्यमार्यस्य यत् Mt अति-[illegible]र्यस्य cett

[2] निशाचरे here $T_1$, $T_2$ निशाचरे after °वैरिणि cett

[3] निरज° Bo निज° W, Sc Missing, $I_2$ निसर्ग cett

[4] अपि add Mt, Mg, $T_1$, $T_2$ only

[5] यो नःस्त्रयी° Bo येनसच° $T_1$ यो नस्त्रयी° cett (+ $T_2$).

[6] ऐक्वाकं changed to ऐक्ष्वाकं Cu एक्वाकं $I_2$ एक्वकं changed to एक्ष्वाकं W रक्वकं Sc ऐक्ष्वाकं cett

[7] °मनरणं E °मनरण्यं cett.

[8] शत्रुरिति कामं Cu, K कामं सचारिति $T_1$ कामशत्रुरिति E कामं शत्रुरिति cett (+ $T_2$)

[9] पुनरप्रतिवीरमप्र° $T_1$, $T_2$ पुनरप्र° cett

[10] °प्रमेयतेजसम° $T_1$, $T_2$ Originally °प्रमेयतपम°, and also या above प by revisor, W °प्रमेयतपसम° cett.

[11] °मतिवीर° om Mt, $T_1$ only ($T_2$ has it)

[12] अप्राकृतं om Mg only

[13] वीर om. Mt वीर along margin by revisor, Cu सत् for वीर K वीर cett.

[14] °पुरुषसञ्चारस्य Mt °पुरुषाचारस्य cett

[15] तस्य Cu, K, Mt, $T_1$, $T_2$ तत्र cett

[16] तादृशो° Md only (तादृग्गे° Mt, Mg).

[17] धर्मपथा changed to धर्म्यात्पथो Cu.

[18] °त्पथोऽपि च्युतः Md, Mt, Mg °त्पथादिच्युतः E °त्पथो विच्युतः cett.

[19] यद्° E तद्° cett

[20] हेला K लीला cett

[21] निर्विघ्नं E, Sc, $I_2$ निर्विघ्नं changed to निर्विघ्न W निर्वि corrected by revisor to निर्विघ्न Cu निर्विघ्न° cett

राक्ष°। [1]ननु भोः किमत्र चिन्त्यते।

[2]द्राङ्[3]निष्पेषविशीर्णवज्रशकलप्रत्युप्तरूढव्रण-
[4]ग्रन्थ्युद्भासिनि [5]भग्नभीम[6]मघवन्मातङ्गदन्तोद्यमे।
भर्तुर्नन्दनदेवताविरचित[8]स्रग्दाम्नि [9]भूमेः सुता
[10]वीरश्रीरिव तस्य वक्षसि जगद्वीरस्य विश्राम्यतु ॥३४॥

। नेपथ्ये कलकलः।

राजा[10a]। [11]भगवन् [12]यत एते [13]यज्ञोपनिमन्त्रिताः पुत्रदारैः सह [14]दिग्भ्यो महर्षयः [15]सम्पतन्ति तत एवाक्रन्दकलिलः [16]कलकलः ॥

सर्व उत्तिष्ठन्ति ॥

लक्ष्म°।[17] का पुनरियं।

[18]अन्त्रप्रोतवृहत्कपाल[18a]नलकाकूरक्वणत्कङ्क[19]ण-
[20]प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्।

---

[1] **ननु** om Cu, K only

[2] **प्राङ्°** in the original, and also **द्रा** along margin, $I_1$ **द्रा** is corrected by revisor along margin, Cu **द्राङ्°** cett

[3] **°व्रणं** W **°व्रण°** cett.

[4] **ग्रन्थ्युद्दामिणि** corrected by revisor to **ग्रन्थ्युद्भासिणि** in the original, and adds **ल्हा** along margin above **द्धा**, Cu **ग्रथ्युद्दामिनि** $I_2$ **ग्रन्थ्युद्भासिनि** cett

[5] **भङ्ग°** $I_1$, Cu, W, Sc, $I_2$, Md **भग्न°** K, E, Bo, Mt, $T_1$

[6] **°मोघ°** $I_1$, Cu, W, Sc, $I_2$, Md **°भीम°** K, E, Bo **°मोह°** $T_1$

[7] **°दन्तो°** Bo, $I_2$ **°दत्तो°** changed to **°दंत्तो°** $I_1$ **°दन्तो°** cett

[8] **°तस्रग्°** changed to **°तासुग्°** Cu **°तंस्रग्°** W **°तस्रग्°** cett.

[9] **°गधाम्नि°** $T_1$, $T_2$ **°गदाम्नि** cett.

[10] **वीरःश्री°** Cu Lacuna in K **वीरश्री°** cett

[10a] **राजा।. . कलकलः** om $I_1$, Md (only)

[11] **भगवन्** om $T_1$ only

[12] **यत** K, Mt, Mg, $T_2$ **य** Cu, W, Sc, $I_2$, $T_1$ **यत्** Bo Has **भगवते** only for **भगवन् यत एते** E

[13] **यज्ञेउप°** W, Sc **यज्ञोप°** cett. [cett

[14] **दिगन्तरेभ्यो** Mt, Mg, $T_1$, $T_2$ **दिग्भ्यो**

[15] **एवायमा°** K, Mt, Mg **एवा°** cett

[16] **°क्रन्दकलितः** Mt, Mg **°क्रन्दः** E, $T_1$ **°क्रन्दकलिलः** cett (+ $T_2$)

[17] **भगवन्** add Mg, $T_1$, $T_2$ only

[18] **अन्त°** changed to **अन्त्र°** W **आन्त्र°** Md, Mt, Mg, $T_1$, $T_2$ **अन्त्र°** cett.

[18a] **जङ्घास्थि** gives as the meaning, $I_1$ only

[19] **°कङ्कणं°** W **°किङ्किणी°** Mt **°कङ्कण°** cett.

[20] **°प्रेङ्खित°** changed to **°प्रेषित°** W **°प्रेङ्खित** cett.

[21] **°घोषयत्य°** Cu, Bo, W, Mg **°घोषवत्य°** E **°घोषत्य°** $T_1$, $T_2$ **°घोषयन्त्य°** cett

पीतोच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लल्द्-
व्यालोलस्तनभारभैरववपुर्बन्धोद्धतं धावति ॥३५॥

विश्वा०।

सेयं सुकेतोर्दुहिता भार्या सुन्दासुरस्य च।
मारीचजननी घोरा ताटका नाम राक्षसी ॥३६॥

कञ्चे। ताद भीसणा हदासा ॥

राजा। मा भैष्टमायुष्मत्यौ ॥

विश्वा०। रामं चिबुके सृशन्। वत्स हन्यतामियम् ॥

सीता। हञ्जी एसो एव्व एत्थ णिउत्तो ॥

रामः। भगवन् स्त्री खल्वियम् ॥

जर्मि०। सुदं अज्जाए एदम् ॥

सीता। सविस्मयानुरागम्। अणदोमुहो एव्व से चित्तभेदो ॥[17a]

---

[1] पीत० Bo, E, W, Sc, $I_2$ पीतो० changed to पीत० Cu पीतो cett

[2] °धन० wrongly, E only

[3] °घोघोललोल० changed to °घोरोल्ल-लद्व्यालोल० Cu

[4] °र्बन्धोद्धतं $I_1$, Md, Mg °र्दर्पोद्धतं W, Sc, $I_2$, Mt, E, K, $T_2$ °र्बद्धतं changed to °र्दर्पोद्धतं Cu °र्ब - द्ध - - $T_1$ °तिंरतं Bo

[5] सेयं सुकेतोस्तनया $T_1$ सेयं सुता सुकेतोश्च $T_2$ सेयं सुकेतोर्दुहिता cett.

[6] सुन्दरी सुरस्य च Bo सुन्दाख्यरक्षसः Mt सुन्दासुरस्य च cett. ( Md, $T_1$)

[7] ताडका Cu, K, Md ताटका cett. ( + Mt, Mg)

[8] ताद K, E, Sc, Md, $T_1$ ताद२ $I_1$, Bo, Cu, $I_2$ Omits this line, W. Has ताद२... खल्वियम् by rev. along margin, Cu.

[9] सा हदा E हदासा cett. Has also the *chāyā* तात भीषणा हताशा along margin, Sc

[10] आयुष्मत्यौ मा भैष्टम् K मा भैष्टमायुष्मत्यौ cett

[11] चुबुके E only.

[12] हञ्जी K, E, Bo, W, Sc हञ्जी२ cett.

[13] णिबुत्तो Cu णिउत्तो cett एष एवाच नियुक्तः has also the *chāyā*, Sc

[14] श्रुतमार्यपेदम् has also the *chāyā*, Sc.

[15] अणदो० $I_1$, Cu, E, Mt, Mg, $T_1$ अणदो Sc, $I_2$, Md अणदो changed to अम्मदो W अमेदो Bo अरमदो K.

[16] °पुहो K °महो E °सुहो om Md सुहो cett

[17] एव Bo एइ Md एव्व om E एइ cett (in Cu it is by rev. along margin)

[17a] अन्यतोमुख एवास्य चित्तभेदः adds the *chāyā*, Sc

राजा। साधु[1] सत्यमैक्ष्वाको रामभद्रः।

राज्ञः। अयं स रामो दाशरथिः। य एष[2]

उत्तालतालकोत्पातदर्शनेऽप्यप्रकम्पितः[3]।[4]

नियुक्तस्तत्प्रमाथाय स्त्रैणेन[5] विचिकित्सते[6] ॥३७॥

विश्वा°। त्वर्यतां। वत्स[7] किं न पश्यसि ब्राह्मणजनस्य[8] सङ्घात[9]-मृत्युमयतः॥

रामः। एवं। भवन्तो जानन्ति।

सर्वदोषानभिष्वङ्गादाज्ञायसमतां[10] गतः[11]।

युष्माकमभ्युपगमैः[12] प्रमाणं पुण्यपापयोः ॥३८॥

इति परिक्रम्य निष्क्रान्तः॥

सीता। अम्मो[13] परागदो[14] एव[15]। हद्धी हद्धी[16]। उप्पादवादाली[17] विअ हदासा महाणुहावं[18] अहिहवदि[19]॥

---

[1] साधु om $T_1$ only

[2] एषः changed to य एषः Cu स एषः $T_1$, $T_2$ य एष om E य एष cett

[3] °कापात° changed to °कोत्पात° Cu.

[4] °दलनेऽप्य° Mt °पवनेऽप्य° K °वचनेष्व° changed to °दर्शनेऽप्य° Cu °दर्शनेऽप्य° cett.

[5] स्त्रैणेन E स्त्रीणेन Md, $T_1$ स्त्रैणेन cett (+ Mt, Mg, $T_2$)

[6] °कित्सति Cu, $T_1$, $T_2$ °कित्सते cett

[7] त्वरता वत्सः $I_1$ त्वरतां वत्स W, Sc, Md, Mg त्वरय वत्स Mt त्वर्यतां वत्स Bo त्वरयतां वत्स E त्वरन्ती वत्स $I_2$ त्वरस्व वत्स $T_1$ वत्स त्वरतां Cu वत्स त्वरैतां K.

[8] महतः add. Md, $I_1$, Bo, E, W, Sc, $I_2$, $T_1$ महतः add. by rev Cu. Not add by K, $T_2$.

[9] सम्पात° W, Sc, $I_2$ संवातः only for सङ्घातमृत्युमयतः Bo °जनसङ्घात° changed to °जनस्य महतः सङ्घात° by rev, Cu. As in text, cett

[10] °समतां cett. °समतीं Bo °समला $I_2$ °समती Cu

[11] घताः Bo गतः K, E गतः changed to गताः Cu गताः cett.

[12] °भ्युपगमः K, E, Bo °भ्युपगमः changed to °भ्युपगमाः Cu °भ्युपागमाः changed to °भ्युपगमाः W °भ्युपगमाः cett

[13] अम्मा Bo अथो E अंहो $T_1$ अम्मो cett

[14] पथिगदो Bo परागआ K परागदो cett.

[15] एव E only

[16] हद्धी W, Sc हद्धी changed to हद्धी२ by rev., Cu हद्धी हद्धी cett

[17] वादाविलि E वादावली $T_1$. Orig. वादाली, but व along margin by rev to be inserted after दा $I_1$ वादाली cett.

[18] °हावं Cu, K °भावं cett.

[19] अहिहवदि K, E अहिहवद changed

राजा[1]। धनुरास्फाल्य[2]। आः पापे तिष्ठ[3] तिष्ठ ॥

ऊर्मि°। अए[4] दाणिं[5] सव्वं[6] एव्व[7] तादो [8]पत्थिदो[9] ॥

चन्द्र°। विहस्य। पश्यन्तु भवन्तस्ताटकाम्[10]।

हृन्मर्मभेदिपतदुत्कटकङ्कपत्र-

संवेग[11]तत्क्षणकृतस्फुरदङ्गभङ्गा[12]।

नासाकुटीरकुहरद्वयतुल्यनिर्य-

दुद्बुद्ध्वनद्[13]सृक्प्रकरा[14] मृतैव[15] ॥३९॥

कन्ये। अच्छरिअं[16] अच्छरिअं। पिअं पिअं णो[17] ॥

राजा। अहो दृढप्रहारिता राजपुत्रस्य[18] ॥

---

to अहिहवदि Cu अभिहवदि $I_1$, Bo, Sc, Mt अभिहवति $T_1$ अभिहवह W अलिद्वदि $I_2$ अभिवट्टदि Md अहो परागत एव। हाधिक्२ उत्पातवातालीव हताशा महानुभावमभिद्रवति add *chāyā*, Sc

[1] रामः for राजा Sc, $T_1$ only

[2] °स्फाल्य changed to °स्फाल्य Cu °स्फालयन् K °स्फाल्य cett.

[3] तिष्ठ for तिष्ठ तिष्ठ Md, Mt, Mg

[4] अये Cu, K अवि $T_1$, $T_2$ अए cett

[5] दाणी E दाणीं W दाणि $I_2$ दाणिं cett

[6] सयं E सव्वं Cu सव्वं cett.

[7] एव Bo जेव E एव्व cett.

[8] पुडमं add $T_1$ only

[9] पत्थिदो Cu only अये इदानीं सममेव तातः प्रस्थितः add. *chāyā*, Sc

[10] °स्ताडकां E, K, Md °स्ताटकां changed to °स्ताडकां Cu °स्तादकी $I_2$ °स्ताटकां cett. (+ Mt, Mg)

[11] Reads संयोग°, and has also वे below यो Cu सम्भेद° K संवेग° cett.

[12] °भागा E °भाङ्गा Cu °भङ्गा cett

[13] °भ्रमद° W, Sc °स्रवद° $T_1$ °स्वनद° $T_2$ °ध्वनद° cett.

[14] °प्रसरा Bo, Md, Mt, Mg, $T_1$, $T_2$. Reads °प्रसरा, but also underlines स, and has क along margin, $I_1$ °प्रकरा cett.

[15] मतैव Cu only.

[16] अच्छरिअं२ K, $I_2$ अछरिअं२ Bo अच्छरिअं Sc अचरियं Cu अच्चरिअं E, W अच्छरिचं $I_2$ अच्चरिअं२ Md, $T_1$, $T_2$.

[17] पिअं णो $I_1$, Bo, Sc पियं पियं णो Cu पिअ णो E, $I_2$ प्रिअं णो W पिअं२ णो K पिअं णो२ Md, $T_1$ आश्चर्यं प्रियमावयोः add *chāyā*, Sc.

[18] राजभद्रस्य $T_2$ only

राच°। हा[1] आर्ये [2][3]ताटके किं हि[4] नामैतत्। अम्बुनि मज्जन्त्यलाबूनि प्लावाणः [5]प्लवन्त इति।

नन्वद्य राक्षसपतेः[6] स्खलितः[7] प्रतापः
प्राप्तोऽद्भुतः[8] परिभवोऽद्य[9] मनुष्यपोतात्।
दृष्टः स्थितेन च मया स्वजनप्रमाथी[10]
दूत्यं[11] जरा च निरुणद्धि कथं करोमि ॥४०॥

विश्वा°। एष तावदोङ्कारः[12] ॥

राच°। अयि[13] भोः किमस्मासु वः[14] प्रतिवचनम् ॥

विश्वा°।

अत्र सीरध्वजो[15] वेत्ता कनिष्ठो हि कुशध्वजः।
अस्याः पिता[16] हि[17] कन्यायाः कुलज्येष्ठः[18][19] प्रभुश्च सः[20] ॥४१॥

राच°। सोऽप्याह[21] कुशध्वजो जानाति विश्वामित्रश्चेति ॥

---

[1] हा om K, $T_1$ हा is a correction, Cu Read हा cett (+ $T_2$)

[2] राक्षसि add $T_1$, $T_2$ only

[3] ताडके E, K, Md ताटके changed to ताडके Cu ताटके om Mt ताटके cett (+ Mg)

[4] हि om Md, Mt only

[5] सम्प्लवन्ते $T_1$, $T_2$ only

[6] °पतेः W, $T_1$, $T_2$ only

[7] °लितः Sc, $T_1$ only

[8] प्राप्तोद्भवः in text and द्भुतः along margin, $I_1$ प्राप्तोऽद्भुतः $T_1$ प्राप्तोद्भुग Bo प्राप्तोद्भवः Sc, Md, E, Cu (corr fr प्राप्तोतः) प्राप्तो द्रवः $I_2$ प्राप्तो नवः K, W

[9] °भवो हि K °भवोऽद्य cett.

[10] °प्रमारो in text and थो along margin, $I_1$ °प्रमाथो K, E, Bo °प्रमादो Cu, Mt, $T_1$ °प्रमारो W, $I_2$ °प्रमारः Md प्रवारो corr to प्रहारो Sc

[11] दूत्यं K only दैन्यं cett

[12] एतावदोङ्कारः W एष तावदोङ्कारो राक्षसिकुलक्षयस्य Bo एष तावदोङ्कारः सकलराक्षससंहारनिगमाध्ययनस्य Mt एष तावदोङ्कारः cett (+ Md, Mg)

[13] अयि $I_2$, Md, Mt, Mg, $T_2$ अपि cett.

[14] च for वः Cu only

[15] भारं° Bo धीरं° Md सीरं° cett. (+ Mt, Mg)

[16] पिता स एव $T_1$ अस्याः पिता हि cett (+ $T_2$).

[17] पि E स Mt, Mg हि cett.

[18] कुले W only

[19] °श्रेष्ठः $T_2$ only [(+ $T_2$)

[20] यः Cu नः W, Sc, Mt, $T_1$ सः cett.

[21] सोऽप्याह om Mg only.

विश्वा°। स्वगतम्। अस्यायमवसरो[1] दिव्यास्त्रमङ्गलानां दानस्य[2]। वर्तते च[3] माङ्गल्यो[4] मुहूर्तः॥ प्रकाशम्। सखे कुशध्वज। मया हि भगवतः[5] कृशाश्वाद् गुरुचर्याव्रतैरधिगतस्य सरहस्यजम्भकप्रयोगसंहरणस्य[6] दिव्यास्त्रमन्त्रपारायणस्य[7] विद्यातत्त्वबीजानि[8] तत्प्रसादा[9]दर्थतश्च[10] शब्दतश्च[11] रामभद्रस्य सम्प्रति प्रकाश्यन्ते[12]।[13]

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परः सहस्राः[14] शरदस्त्रपांसि।
एतान्यपश्यन् गुरवः[15] पुराणाः
स्वान्येव तेजांसि तपोमयानि॥४२॥

राजा[16]। अनुगृहीतं रघुकुलम्॥

लक्ष्म°। दिष्ट्या देवदुन्दुभिध्वनिः पुष्पवृष्टिश्च॥

राघ°। आः[17]। दिवौकसोऽपि राजविरुद्धमनुमोदन्ते[18]॥

---

[1] अयमव° K यस्त्वयमव° $T_1$ अस्त्वयमनव° $T_2$ अस्यायमव° cett

[2] नादस्य Bo only

[3] च om $T_1$ only.

[4] माङ्ग° Cu, K, E, $T_1$, $T_2$ मङ्ग° cett

[5] भवतः corr to भगवतः W

[6] सरहस्यस्य Mt, $T_2$ रहस्यस्य $T_1$ सरहस्य° om Md, Mg सरहस्य° cett

[7] °जृम्भक° E, W, Sc, Mt °जम्भगस्त्र° $T_2$ °जम्भक° cett

[8] °संहारस्य W, Sc, $T_1$, $T_2$ °संहरस्य $I_2$ °संहरणस्य cett

[9] °मङ्ग° for °मन्त्र° $T_1$ only

[10] विद्या अधीताः for विद्यातत्त्व°जानि Mt only.

[11] एताः add Mt only.

[12] तत् changed to मत् Sc मत् Mt, $T_1$, $T_2$ तत् cett

[13] °दर्थतः $T_1$, $T_2$ °दर्थतश्च cett

[14] शब्दात्मना च $T_1$, $T_2$ शब्दतश्च cett.

[15] लब्धात्मना add Mt only

[16] प्रकाश्यन्ते K, E, W प्रकाश्यन्ती Cu प्रकाशन्ते Sc, $I_2$ प्रकाशन्तां $I_1$, Bo, Md, $T_1$.

[17] °सहस्रं Mt, Mg, $T_1$, $T_2$ °सहस्राः cett

[18] शरदरत° E शरदत° changed to शरदः तः Sc शरदा तः Mg शरदस्त° cett

[19] °पश्यन् Cu, E, K, Bo, W °दर्शन् underlined in text, and पश्य along margin, Sc °दर्शन् $I_1$, $I_2$, Md, $T_1$.

[20] गुरवः Cu, K, Mt, $T_1$, $T_2$ मुनयः cett.

[21] रामः for राजा $T_2$ only

[22] आः by rev along margin, Cu आः om. Md, Mt, Mg आ $T_1$ आह $T_2$ आः cett

[23] °मनुतिष्ठन्ति for °मनुमोदन्ते Mt only.

लक्ष्म०। कथम्।

झटित्येवोत्तप्तद्रुतकनकसिक्ता इव दिशः
पिशङ्गत्वात्सन्ध्यान्तरित इव निर्भाति दिवसः।
ज्वलत्केतुव्रातस्थगितमिव दिव्यास्त्रनिचयै-
र्नभो नैरन्तर्यप्रचलिततडित्पिञ्जरमिव ॥४३॥

राजा।

तेजोभिर्दिशि दिशि विश्वतः प्रदीप्ते-
रादित्यद्युतिमवधीर्य विस्फुरद्भिः।
पर्यायत्वरितगृहीतविप्रयुक्तं
सामर्थ्यं रहयति नायनो मयूखः ॥४४॥

कञ्चे। समन्तदो पज्जलिदविज्जुपुञ्जपिञ्जरेण उक्कमन्ति विअ लोअणाइं पहापरिप्फन्देण ॥

---

[1] °वृत° for °द्रुत° $T_1$ only.

[2] चाभाति Mg, $T_1$ निर्भाति cett (+ $T_2$)

[3] दिवसं Cu only

[4] °त्केतुव्रत° E °त्केतुवृक° $T_1$ °त्केतोरात° $T_2$ °त्केतुव्रात° cett

[5] °गित इव Md, Mt, Mg °गितमिव cett.

[6] °निचितं Mt, Mg, $T_1$, $T_2$ °निचयैर् cett

[7] °विद्युत् $T_2$ °तटित् $T_1$ °तडित् cett

[8] °त्पञ्जर° corr to °त्पिञ्जर° $I_1$ °त्पञ्जर° E, Md, $T_1$, $T_2$ °त्पुञ्जकं° Mt °त्पेञ्जर° K °त्पिञ्जर° cett.

[9] राजा add K, E, Sc अपि च add Mt, Mg, $T_2$ only.

[10] °मपविध्य for °मवधीर्य $T_1$, $T_2$ only.

[11] °मुक्तं for °युक्तं $T_1$ only.

[12] हरयति for रहयति $T_1$ only.

[13] नायनो $I_1$, Md, Mt, Mg, $T_1$, $T_2$ नाथनो Cu नाषनां Bo तापनो cett

[14] सम्मन्तदो Cu समिद्दो $T_1$, $T_2$ समन्तदो cett

[15] पजुलिद° Md, Mt, Mg पलिद° changed to पज्जलिद° Cu यश्लिद° Bo पज्जलद° K पज्जलिद° cett

[16] विज्जुपुञ्ज° K, E, Cu (corr. fr विजुपुञ्ज°) विजुप्पुञ्ज° W, Sc, $I_2$ विज्जुप्पुञ्ज° $I_1$, Bo, Md, $T_1$

[17] उक्खमन्ति in text and also ङ्क along margin, $T_1$ - उभति Md, Mg उक्कमिति Mt उक्खिमन्ति $T_1$, $T_2$ उक्कमन्ति cett

[18] लोअणाइ Sc, $I_2$ लोअणाइ E लोअणाइं cett

[19] पहापनिप्फन्देण $I_1$, $I_2$ पहापनिप्फदगः Bo पहापरिक्कन्देण corr to पहाए निप्पन्देण Cu पहावनिथन्देण W पहा-

राघ°। अहो दुरासदं दिव्यास्त्रतेजः[1]। स्त्यायता[2] येन[3] रावणपु-
रन्दरद्वन्द्वसंरम्भं स्मारितोऽस्मि[4][5]।

सर्वप्राणप्रवणं[6]मघवन्मुक्तमाहत्य[7] वक्ष-
स्तत्सङ्घट्टाद्विघटितबृहत्खण्डमुच्चण्डरोचिः[8][9]।
एवं[10] वेगात् कुलिशमकरोद् व्योम विद्युत्सहस्रै-
र्भर्तुर्वक्त्रज्वलनकपिशास्ते[11][12] च रोषाट्टहासाः ॥४५॥

विश्वा°। अभिवन्द्य[13] त्वं विसर्जय[14] चैनं रामभद्र दिव्यास्त्राणि।

ब्रह्मेन्द्ररुद्रविष्णुशरुद्वरुणप्राचीनबर्हिर्मरु-
त्कालाग्निव्यतिरेकिणां[15] भगवतामाम्नायमन्त्रात्मनां।
एतेषां तपसामिवाप्रतिरथैस्तेजोभिरुत्कर्षिणा[16][17]-
मेकैकस्य जगत्त्रयप्रमथनत्राणावधिर्योग्यता ॥४६॥

नेपथ्ये।

एष प्रह्वोऽस्मि भगवन्नेषा विज्ञापना च[18] नः[19]।
दिव्यास्त्रसम्प्रदायोऽयं[20] लक्ष्मणेन सहास्तु मे ॥४७॥

---

वनिष्पन्देण Sc पभापरिप्पदेण E पहापरिप्फन्देण K, Md, $T_1$ समन्ततः प्रज्वलितविद्युत्पुञ्जपिञ्जरेणोत्क्रमन्तीव लोचनानि प्रभावनिष्पन्देन add *chāyā*, Sc.

[1] स्फुरति add Mg only

[2] स्त्यायति Mt सन्धीयता W, Sc स्त्यायता om Mg संस्त्यायते $T_1$ स्त्यायता cett (+ $T_2$, Md)

[3] ऽनेन for येन $T_2$ only

[4] °द्वन्द्वयुद्धसंरम्भं Bo only

[5] °सि for °स्मि Bo only

[6] °प्रणव° Bo °प्रणव° corr to °प्रवण° W °प्रवण° cett.

[7] °माहात्म्य for °माहत्य Mt only

[8] °त्सङ्घर्षा° E, W, Sc, $I_2$ °त्सङ्घट्टा° cett

[9] °हद्खण्ड° for °हत्खण्ड° $T_1$ only.

[10] एव for एवं E only

[11] °वंज्र° for °वंक्त्र° $T_1$ only

[12] °कपिला° for °कपिशा° $T_1$ only

[13] °वाद्य $T_1$ °वन्द्य $T_2$ °वन्दस्व cett

[14] च om Cu, $T_1$ only

[15] °लाग्नि° in text, and द्य along margin, $I_1$ °लाद्य° W, Sc, $I_2$ °लाग्नि° cett

[16] °प्रतिहते° K, Mt, $T_1$, $T_2$ °प्रतिरथै° cett

[17] °त्कर्षिणा° for °त्कर्षिणा° $T_1$ only.

[18] हि for च E only

[19] वः Mt, $T_1$, $T_2$ नः cett

[20] °दानोऽसौ $T_1$ °दानोऽयं $T_2$ °दायोऽयं cett.

विश्वा०। रामभद्र एवमस्तु[1] ॥

लक्ष्म०। अहो प्रसादः[2]।

झटित्युन्मीलितप्रज्ञमप्रतर्क्यं[3] च शक्तिभिः।
ज्योतिर्मयमिवात्मानं[4] मन्ये विद्याप्रकाशनात् ॥४८॥

नेपथ्ये[5]।

राम राम महाबाहो वयं त्वय्यायतामहे।
विश्वामित्राभ्यनुज्ञानात् सह भ्रात्रा प्रशाधि नः ॥४९॥

कन्ये। [6]देवदाओ[7] मन्तेन्ति। अहो[8] अच्छरिअम्[9] ॥

नेपथ्ये[10]। भगवन्तो[11] दिव्यास्त्रनिकायाः।

विश्वामित्रात्प्राप्य विश्वस्य मित्रा-
त्पुण्यैर्युष्मानद्य[12] रामः कृतार्थः।
ध्यातैर्ध्यातैः सन्निधेयं भवद्भिः
स्वं स्वं[13] स्थानं यात[14] यूयं नमो वः ॥५०॥

लक्ष्म। आर्यवचनादन्तरितान्यस्त्राणि[15][16][17] ॥

---

[1] तथास्तु for एवमस्तु Mt, Mg, $T_1$, $T_2$ °मस्तु .... मन्ये विद्या om Md only

[2] प्रसादं for प्रसादः Bo only

[3] °प्रतर्कं corr. to °प्रतर्क्यं Cu

[4] °महात्मानं for °मिवात्मानं $T_1$ only

[5] अहो add Mt, $T_1$, $T_2$ अहो add Mg only.

[6] देवदाअ $I_1$ देवदाआ Md, Mt, Mg देवताओ K देवताओ corr to देवदाओ Cu देवताओ वि $T_1$, $T_2$ देवदाओ cett.

[7] मंत्तेंत्ति $I_1$ मंत्तेति K, $I_2$ मंतेंति Md, Mt, Mg मन्तेति Bo मतेदि E, Sc, Cu (corr fr मंत्तेति) मिस्सयंति $T_1$ मंत्तेदि W

[8] अहो om. $T_1$, $T_2$ only.

[9] अच्छरिअं२ $I_1$, Bo, Sc अच्छरियं२ (corr fr अच्छरियं) Cu अच्छरिअं K, W, $I_2$ अच्चरिअं E अच्चरिअं२ Md अच्चअं२ $T_1$ देवताः मन्त्रयन्ति अहो आश्चर्यम् add *chāyō*, Sc

[10] नेपथ्ये om Mg only

[11] भगवते E भवन्तो Md भगवन्तो cett. (+ Mt, Mg)

[12] °त्पुप्पै° corr to °त्पुण्यै° W

[13] स्वसं Bo स्वस्व E स्वयं W स्वं स्वं cett

[14] यत्र for यात $T_1$ only.

[15] आचार्य° for आर्य° E only

[16] °दन्तरिता° corr to °दवरिता° Cu °दन्तहिंता° $T_1$, $T_2$ °दन्तरिता° cett.

[17] °तान्यपि शस्त्राणि Cu °तान्यस्त्राणि cett

राजा[1]। भगवन्[2] महाद्भुत[3]निधे कुशिकनन्दन नमस्ते।
ज्वलित[4]तपस्तेजोराशेर्जगत्यमितौजस-
स्तव निरवधौ माहाभाग्ये कृतस्तुतिसाहसः।
प्रमित[5]विषय[6]यां शक्तिं विन्दन्न वाचि न चेतसि
प्रतिहतपरिस्पन्दः[7] स्तोता विषद्य हृणी[8]यते ॥५१॥

*अतः[9] स्पृहयामि युष्मदनुगृहीतरामभद्रालङ्कृताय[10] दशरथाय। वयं पुनरार्येण[11] वञ्चिताः यदीदृशेन जामात्रा न सम्प्रयु[12]ज्यामहे ॥

विश्वा°। विहस्य[13]। किमद्यापसम्भावनेय[14]मस्मासु ॥

राजा। शान्तम्[15] ॥

विश्वा°। तेन[16] हि।
शम्भोर्वरादनुध्यान[17]मात्रोपस्थान[18]दायि वः[19]।
रामभद्रस्य पुरतः प्रादुर्भवतु[20] तद्धनुः[21] ॥५२॥

राजा। एवमस्तु ॥ ध्यात्वा प्रणमति ॥

---

[1] रामः for राजा $T_1$ only
[2] भगवन् om. $T_1$ only
[3] महात्म्य° for महाद्भुत° Sc only
[4] ज्वलिततपस्तेजो° Sc अकलिततपस्तेजो° Mt ज्वलिततपस्तेजो° cett
[5] प्रतित° Bo प्रमिति° Md, Mt, Mg, $T_1$ प्रमित° cett. (+ $T_2$)
[6] °विषाया (corr fr लिषायां) Cu °विषयां cett
[7] °स्यन्दः Cu, K, Md, Mt, Mg °स्यन्द° Sc °स्यन्द° cett
[8] घृणायते Cu हृणीयते Bo, Md, Mg घृणीयते cett
[9] अतः om. Mg, $T_1$, $T_2$ only यतः cett.
[10] राज्ञे add $I_1$, Bo, E, W, Sc, $I_2$, Md, $T_2$ only
[11] °राचार्येण for °रार्येण Bo only
[12] सम्प्रयु° Cu, K संयु° cett
[13] विहस्य K, E विहस्य om cett.
[14] °द्यापि सम्भाननेयममासु E only.
[15] पापम् add Mg पापम्२ add $T_1$, $T_2$ only
[16] तेनेह for तेन हि Md, Mg only
[17] °दनुध्यात° Md, Mg °दिहाध्यान° E °दनुध्यान° cett
[18] °पस्थापन° for °पस्थान° Cu only.
[19] नः for वः W, $T_2$ only
[20] °र्भवति for °र्भवतु $T_1$ only
[21] तद्भृतः for तद्धनुः Bo only.

राच्ञ° । स्वगतम् । एभिरन्यदेव किमपि प्रस्तुतम् ॥ प्रकाशम् । भोः कुशध्वज । कियच्चिरं विचार्यते ॥

राजा[2] । उक्तमेतत्[3] आर्यो[4] जानातीति[5] ॥

राच्ञ°[6] । प्रत्युक्तमेतत्[8] सोऽप्याह कुशध्वजो जानातीति[9] ॥

राजा[10] । एवमेतत् सीरध्वजो[11] जानातीति ॥

[12]नेपथ्ये कलकलानन्तरम्[13] ।

[14]स्फूर्जद्वज्रसहस्रनिर्मितमिव[15] प्रादुर्भवत्यग्रतो[16]
रामस्य त्रिपुरान्तकृद्विषदां तेजोभिरिद्धं धनुः ।

सीता । [17]सम्पदं संसइद म्हि[18] ॥

राजा[19] । शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डकस्तस्मिन्नाहित एव ।

---

[1] °च्चिरमादृतोऽस्मि Mt °च्चिरमनादरः Mg, $T_1$, $T_2$ °च्चिरं विचार्यते cett

[2] For this line and the next two राजा । एवमेतत् सीरध्वजो जानातीति in the orig, and by rev आर्यो जानातीति । राच्ञः । प्रत्युक्तमेतत् । सोऽप्याह राजा एवमेतत् कुशध्वजो जानातीति along margin, Cu

[3] उक्तमेव तत् Bo उक्तमेवैतत् K एवमेतत् Cu उक्तमेतत् cett

[4] सीरध्वजो for आर्यो Mt, Mg, $T_1$, $T_2$ only. [K जानातीति cett

[5] जानीत इति Md, Mt, Mg जानाति

[6] Om. this line and the next, Mt, Mg, $T_1$, $T_2$ Om. this line only, Bo. For Cu see above As in text, cett

[7] प्रयुक्त° for प्रत्युक्त° W only.

[8] यतः add. K only.

[9] जानाति K, W जानीत इति Md जानातीति cett.

[10] राजा om. W only.

[11] कुशध्वजो जानीत इति Md सीरध्वजो जानाति इति K सीरध्वजो जानातीति om. E, W, Sc कुशध्वजो जानातीति $I_1$, Bo, $I_2$

[12] राच्ञ add. $I_1$, Bo राच्ञ । प्रित्युक्तमेतत् । सोऽप्याह कुशध्व add. $I_2$ As text, cett [$T_1$, $T_2$ only

[13] कलकलः for कलकलानन्तरम् Mt, Mg,

[14] राच्ञ add Sc राजा add $T_1$ As text, cett (+ $T_2$)

[15] स्फुर्ज° E, Sc स्फुर्ज° $I_2$ स्फूर्ज° cett

[16] °निर्ज्जित° Cu °निर्मित° cett.

[17] अपवार्य add W, Sc स्वगतं add Mt, $T_1$, $T_2$ only

[18] साम्प्रतं संशयिताऽस्मि add. *chāyā*, Sc.

[19] राजा Mt, Mg, $T_1$, $T_2$, K विश्वा° राजानं प्रति $I_1$, Bo, E, W, Sc, $I_2$, Md राजा in the orig marked above, and विश्वा° राजानं प्रति along margin, Cu.

ऊर्मि°। अवि[1] णाम एवं[2] भवे[3] ॥

राजा। गर्जितगुणं कृष्टं च

ऊर्मि°। हृष्टां[4] लज्जितां[5] सीतामालिङ्ग्य[6][7]। दिट्ठिआ[8] वड्ढामो ॥

राजा। साद्भुतम्[9]। भग्नं च तत् ॥ ५३॥

राघ°। स्वगतम्। अहो दुरात्मनो[10] रामहतकस्य सर्वङ्कषः[11] प्रभावः ॥

नक्ष°।

दोर्लीलाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः[12][13]।
द्राक्पर्याप्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदर[14][15]-
भ्राम्यत्पिण्डितचण्डिमा[16][17] कथमहो नाद्यापि विश्राम्यति ॥ ५४॥

राजा। सहर्षोन्मादमिव[18]।

एह्येहि वत्स रघुनन्दन रामभद्र[19]
चुम्बामि मूर्धनि चिराय परिष्वजे त्वाम्[20]।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा[21] चरणपुष्करकद्वयं ते[22] ॥ ५५।

---

[1] अवि E, $T_1$, $T_2$ अपि cett.

[2] एवं corr to एवं Cu

[3] भ om by pigment, Cu अपि नामैवं भवेत् add *chāyā*, Sc.

[4] हृष्टा for हृष्टां W, Sc only.

[5] लज्जितां om Md only.

[6] च add. Mt, Mg only.

[7] °मालच्च Cu, K °मालिङ्ग्य cett.

[8] वट्टामो $I_1$, W, $I_2$ वट्टामो Cu, E, K, Sc, Md वश्मो Bo वड्ढामो $T_1$ दिष्ट्या वर्द्धावहे add *chāyā*, Sc

[9] च add $T_1$, $T_2$ only

[10] दुरात्मनो om $I_1$ only.

[11] सर्वकष for सर्वङ्कषः Bo only.

[12] दोर्लीला° in the text, as also दोर्लीला° along margin in pencil, Sc दोर्लीला° only, cett

[13] °ष्टाङ्कार° $I_1$, $I_2$ °ष्टङ्कार° cett

[14] °पर्यस्त° Mt, $T_1$, $T_2$ °पर्यन्त° Mg °पर्याप्त° cett

[15] °मित° $I_1$, Md, Mg, $T_1$, $T_2$ °वृहद्° Mt °मिलद्° cett

[16] °द्रे भा° W only.

[17] °त्पण्डित° for °त्पिण्डित° E only

[18] °न्माद् इव for °न्मादमिव Mg only

[19] रामभद्र Cu, K, Mt रामचन्द्र cett.

[20] त्वा for त्वां E only

[21] मध्ये for वन्दे $T_1$ only.

[22] च for ते $T_2$ only

प्रविश्य रामः। कथमतिवात्सल्यादतिक्रमोऽपि ॥

विश्व°। गुरुर्भवान् गर्भरूपश्च ते वत्सो रामभद्रः ॥

राजा। प्रणम्य। भगवन् ॥

रामेण पत्या सीतायाः पूर्णास्ता युष्मदाशिषः।
अस्मिन्नेवोत्सवे दत्ता लक्ष्मणाय मयोर्मिला ॥५६॥

कञ्चे। सास्रम्। अम्महे दिण्ण म्ह ॥

राघ°। स्वगतम्। दृष्टं द्रष्टव्यम् ॥

विश्वा°। सुष्ठु शिरसा बहुमन्यामहे। वक्तव्यशेषस्त्वसि ॥

राजा। नन्वाज्ञापय ॥

विश्वा°। दुहितरौ ते माण्डवी श्रुतकीर्तिश्च भरतशत्रुघ्नाभ्यामर्थये ॥

---

[1] कथमपि Cu केवलमिव $T_2$ कथमति° cett

[2] °दतिक्रामति प्रसङ्गः Mt, Mg, $T_1$ °दतिक्रमोऽपि cett (+ $T_2$)

[3] राजन् add Mt, Mg, $T_2$ only

[4] °र्भगवान् Cu, E °र्भवान् cett

[5] अर्भकरू° W, Sc वत्सरू° Mt गर्भरू° cett

[6] वत्सरो for वत्सो W only

[7] तं added by rev, Cu. No तं K तं add cett

[8] रामोपपत्या W, Sc रामेणापत्य E रामेण पत्या cett.

[9] अम्हहे Cu, K अह्म E अम्हो $T_1$, $T_2$ अम्महे cett

[10] दिण म्ह Cu, Bo, W देहिणह्म E दिण म्ह cett अहो दत्ताः स्म add *chāyā*, Sc

[11] स्वगतं by rev, Cu स्वगतं om Mt, Mg, $T_1$, $T_2$ Have स्वगतं cett

[12] द्रष्टव्यं for दृष्टं E only.

[13] च add Mg चाच add $T_2$ only

[14] सुष्ठुतरं for सुष्ठु शिरसा Mg, $T_1$, $T_2$ only

[15] वक्तव्ये शे° E वरितव्यशे° $T_1$ वक्तव्यशे° cett (+ $T_2$)

[16] °शेषस्त्वसि E °शेषस्त्वमसि Md °शेषं त्वसि Mt, Mg, $T_1$ °शेषस्त्वसि cett (+ $T_2$)

[17] राजा।....अथान्येन केन om $T_1$ only

[18] च add Mt only

[19] तेऽपि add $T_2$ only

[20] °मभ्यर्थये for °मर्थये $T_2$ only

राज्ञः । स्वगतम् । पश्यत[1][2] वनेचरस्य सतः क्षत्रियकुटुम्ब[3][4][5]वैयात्यं ब्राह्मणस्य ॥

राजा । भगवन्[6] किमत्र किञ्चिद्विचार्यमस्ति । किन्त्वत्र वस्तुनि[7] परवानस्मि ॥

विश्वा० । केन ॥

राजा । एकेन तावद् भवतैव[8][9] ॥

विश्वा० । अथान्येन केन[10] ॥

राजा । आर्यसौरध्वजेन गौतमेन शतानन्देन च ॥

विश्वा० । उपहसन्[11] । [12]सौरध्वजशतानन्दयोरहं[13] विवेक्ता[14] ॥

राजा । भगवानिदानीं[15][16] जानाति ।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः ।
यत्र दाता ग्रहीता[17] च कल्याणप्रकृतिर्भवान्[18] ॥५७॥

विश्वा० ।[19] [20]वत्स शुनःशेफ[21] । अयोध्यां गत्वा ब्रूहि भगवन्तमस्मद्वचनाद्[22] वसिष्ठम् ।

---

[1] पश्य K पश्य corr to पश्यत Cu पश्यत om $T_2$ पश्यत cett

[2] पश्यत add Mt तपस्वतः add Mg, $T_2$. Add nothing, cett

[3] क्षत्रियकु० Cu, K, Bo, $T_2$ क्षत्रिये कु०

[4] °कुटुम्ब० om W only

[5] वैजात्यं corr to वैयात्यं Cu वैजात्यं E, W, Sc, Md वैयात्यं $I_1$, K, $T_2$, Bo, $I_2$

[6] भगवन् om $T_2$ only.

[7] वस्तुनि add by rev, Cu वस्तुनि om K वस्तुनि cett

[8] भगवतैव for भवतैव $T_2$ only

[9] विचार्यमस्ति add E only

[10] केन om $T_2$ only

[11] उपहसन् K, Md अपहसन् by rev, Cu अपहसन् cett उपहसन् om. Mt, Mg, $T_1$, $T_2$

[12] तर्हि add Mt, $T_1$, $T_2$ only

[13] एव add Mt अपि add Mg only.

[14] वेदयिता Mt वेत्ता Mg विनेता $T_1$, $T_2$ विवेक्ता cett.

[15] भवा० for भगवा० Cu only.

[16] °निदं for °निदानीं E only.

[17] ग्रहीता Cu, K गृहीता cett

[18] कल्याणप्रतिभूर्भ० Mg, $T_2$ तुल्यप्रतिज्ञतिर्भ० K कल्याणप्रज्ञतिर्भ० cett

[19] एवम् add K only

[20] आकाशे add E, Mt, Mg, $T_1$, $T_2$ only.

[21] °शेफ Cu, K, W, Sc, Md, Mt, Mg °शेप cett.

[22] मद्वचनात् भगवन्तं वशिष्ठं $T_1$, $T_2$ भगवन्तमस्मद्वचनाद् वसिष्ठ cett

एताश्चतुर्भ्यो रघुनन्दनेभ्यो निमेर्गृहे राजसुताश्चतस्रः ।
वसिष्ठवत्नौतमवच्च भूत्वा दत्ताः प्रतीष्टाश्च समं मयैव ॥५८॥

तदुपनिमन्त्र्य सर्वान् महर्षीन् महाराजदशरथस्यानुयातो वैदेहनगरमागच्छ । तदा मम मैथिलस्य च राज्ञो यज्ञसमाप्तौ विततगोदानमङ्गलाः कुमाराः परिणेष्यन्तीति ॥

कुमा°। स्वगतम्। प्रियात् प्रियतरं नः ॥

कन्ये। दिट्ठिआ अविप्पवासो दाणिं भइणिआणं हुविस्सदि॥

राघ°। अद्यापि भोः शृणुत धर्माक्षरम् । अनर्थं एष वो यत्कन्येयमन्यस्मै दीयत इति ।

---

[1] वशिष्ठ° Cu, K, $I_2$ वसिष्ठ° cett.

[2] दत्तः प्रतीष्टाश्च K दत्ताः प्रदिष्टाश्च $T_1$, $T_2$ दत्तप्रतिष्ठाश्च cett.

[3] °राज° om Bo only.

[4] दशरथस्यानुयातौ E दशरथस्यानुज्ञातो W दशरथानुजातो $I_2$ दशरथानुयातो Mg, $T_1$, $T_2$ दशरथस्यानुयातो cett.

[5] विदेह° for वैदेह° Md, Mt, Mg only

[6] तथा for तदा Mt only तदा . . . . राज्ञो om $T_1$ only [only

[7] मिथिलस्य for मम मैथिलस्य च $T_2$

[8] राजर्षेः Mt only राज्ञो cett

[9] °परिसमाप्तौ for °समाप्तौ $T_1$, $T_2$ only.

[10] विहित° for विवत° $T_1$, $T_2$ only.

[10a] Has 'Having the hair cut' along margin, W.

[11] परिपोष्यन्तीति E परिणेष्यन्ति Md, Mt परिणेष्यन्तीति cett.

[12] राजा for कुमा° $T_1$ only.

[13] स्वगतं om. Mt only.

[14] प्रियात् om. K, $T_1$ only.

[15] प्रियं for प्रियतरं $T_1$ only.

[15a] कन्ये om E.

[16] दितिआ Bo दिष्टिआ K, Sc दिष्टेआ $I_2$ दिठी E दिट्ठिआ cett

[17] दणिं $I_2$ दाणि E दाणिं cett

[18] आणं Bo only आणुणं E only भणिआणं cett.

[19] ऊविस्सदि K, Md हविस्सदि Cu दुविस्सदि E भविस्सदि $I_1$, Bo, W, Sc, $I_2$, $T_1$ दिष्ट्या अविप्रवास इदानीं भगिन्योर्भविष्यति add. *chāyā*, Sc.

[20] आदेऽपि E आथापि Md अद्यापि cett ( + Mt, Mg)

[21] भोः . . . . ज्ञाध्येऽपि om. Bo.

[22] शृणु for शृणुत $T_1$ only.

[23] एष Cu, K, $T_1$, $T_2$. Lacuna, Bo एव cett

[24] Lacuna, Bo वो corr. to वै Cu आपतितः for एव वो Mt वो cett.

[25] °मस्मै W, $T_1$, $T_2$ Lacuna, Bo इयमन्यस्मै om. K °मन्यस्मै cett.

पौलस्त्यो विनयेन[1] याचत इति श्लाघ्येऽपि[2] वो नादरः
सम्बन्धे सति यत्[3] त्रिलोकपतिना सौख्यं न तच्च[4] स्पृहा[5]।
गन्तव्या पुनरन्यथैव[6] नियतं लङ्कापि[7] नः सीतया
तन्मा भूदिह वः[8] पुरन्दरपुरीवन्द्यि[9]प्रसक्तो विधिः[10] ॥५९॥

5 नेपथ्ये कलकलः।

राज्ञ[11]। तत्कावकालपर्जन्यभीमौ[11a] वृन्देन[12] धावतः[13]।
विश्वा०। [14]एतौ सुबाहुमारीचौ पुत्रौ सुन्दोपसुन्दयोः ॥[15]६०॥
तद्वत्सौ रामलक्ष्मणौ[16] प्रहन्यतामेष[17] यज्ञप्रत्यूहः ॥
तौ[18]। यथाज्ञापयसि[19][20] ॥ इति[21] विकटं परिक्रामतः ॥

10 कञ्चे। एत्थ दाणिं[22] कहम् ॥

---

[1] विनयेन K, Md, Mt, Mg पिनयेन corr to विनयेन W पि नयेन cett

[2] °घ्ये विधौ ना° Mg °घ्ये न वो ना° $T_1$, $T_2$ °घ्येऽपि वो ना° cett.

[3] यच्च लोक° Mg वः त्रिलोक° E यत् त्रिलोक° cett

[4] कुच for तच्च $T_1$ only

[5] स्पृहाः for स्पृहा W only

[6] °रन्यथैव Md °रन्यथापि $T_1$ °रन्यथैव cett (+ Mg, Mt, $T_2$)

[7] लङ्का च वः $T_1$ लङ्का च यत् $T_2$ लङ्कापुरी Mt लङ्कापि नः cett

[8] व changed to नः Cu वः cett

[9] वन्द्री° E, Mg वन्द्री° corr. to वन्द्रि° $I_1$ बन्धि° $T_1$, $T_2$ वन्द्रि° cett

[10] वयः for विधिः $T_1$ only

[11] राजा। . . . . धावतः om. here, Mt only

[11a] तत्कावितावकाल° W, Sc तत्कावकाल° corr to तत्कालकाल° Cu कौकालकाल° Mg तत्कावकाल° cett

[12] °पर्जन्यौ K, Md, Mg पर्यन्यौ corr. to °पर्यन्य° Cu °पर्जन्य° cett

[13] धातवः for धावतः $I_1$ only.

[14] ऊर्ध्वमवलोक्य add Mt only

[15] रावणानुचरौ घोरौ यज्ञप्रत्यूहकारिणौ add K, E, W, Sc, $I_2$ संवर्तकालपर्जन्यभीमौ वृन्देन धावतः add Mt only

[16] रामलक्ष्मणौ om $T_1$ only.

[17] प्रहन्यतामेष यज्ञप्रत्यूहः K, Cu हन्यतामेतौ यज्ञप्रत्यूहनौ Md, Mg प्रतिहन्यतामेष यज्ञप्रत्यूहः $T_1$, $T_2$ हन्यतामेष यज्ञप्रत्यूहः cett.

[18] तौ om Bo तौ . . . . °पयसि om $T_2$ उभौ for तौ Md, Mt, Mg तौ cett (+ $T_1$)

[19] यदा° for यथा° $T_1$ only

[20] °पयति E, Mt °पयसि cett.

[21] रामलक्ष्मणौ for इति $T_2$ only

[22] दाणी W दाणी E दाणिं cett अचेदानीं कथम् add *chāyā*, Sc.

राघ°।

हन्त साध्विव[1] सम्पन्नं विपर्यस्तो विधिर्भवेत्।
तद्वीक्ष्य कार्यपर्यन्तं माल्यवत्युपवेदये[2] ॥६१॥

राजा। धनुरास्फालयन्[4]। वत्स[5] रामभद्र वत्स लक्ष्मण। अप्रमत्तः[6] प्रमत्तं विजयस्व। अयमहं[7] परागत एव ॥

विश्वा°। विहस्य[8] सहस्रग्रहम्[9]।

राजन्नितो[10] ह्येहि सहानुजस्य
रामस्य पश्याप्रतिमानमोजः।
ब्रह्मद्विषो ह्येष हिनस्ति[11] सर्वा-
नाथर्वणस्तीव्र इवाभिचारः ॥६२॥

इति निष्क्रान्ताः सर्वे ॥

॥ [12]प्रथमोऽङ्कः ॥

---

[1] साध्विव for साध्विव E only.
[2] °वेद्येत् for °वेदये Bo only
[3] मन्यु° for धनु° Bo only
[4] °स्फाल्य for °स्फालयन् $T_1$ only
[5] वत्स om. E only
[6] अप्रमत्तं for अप्रमत्तः प्रमत्तं $I_2$ only
[7] अयमहं for अयमहं E only
[8] विहस्य by 1ev Cu विहस्य सहस्र-ग्राहम् $T_1$ only.
[9] °ग्रहं corr. to °ग्राहं Cu ग्राही W, Sc, $I_2$ °ग्रहं Bo, K °ग्राह $I_1$, E, Md, $T_1$
[10] ग्राहि for ह्येहि Mg only
[11] निहन्ति for हिनस्ति Mt, Mg, $T_2$ only
[12] कौमारो नाम add Cu, K, Md कुमारो नाम add. Bo only

[1] ततः प्रविश्यात्युपविष्टः सचिन्तो[2] माल्यवान्॥

माल्य॰। भो[3] यतः प्रभृति सर्वमायात् सिद्धाश्रमवृत्तान्तमश्रौषं तत आरभ्य

दूराद्वीयो धरणीधराभं
यस्ताटकेयं[4] तृणवद् व्यधूनोत्[5]।
हन्ता सुबाहोरपि ताटकारिः[6]
स राजपुत्रो हृदि बाधते माम्[7] ॥१॥

तदनुज्ञवानां च[8] भूयसां क्षणेनैकेन[9] वध इति किमेतदाश्चर्यम्[10]।
वीर्योत्कर्षैर्यदमृतभुजां निर्ममे पद्मयोनि-
स्तस्य द्वैधं[11] व्यधित धनुषः[12] शाम्भवीयस्य रामः।
दिव्यास्त्रोपनिषदमृषेर्यः कृशाश्वस्य शिष्या-
द्विश्वामित्राद्विजयजननीमप्रमेयः प्रपेदे॥२॥

[13]प्रसह्य रावणद्विष्टमस्मद्भूतस्य[14] पश्यतः।
अस्त्रदानाद्भुतं काले[15] प्रौढेन मुनिना कृतम्॥३॥

---

[1] ॥ श्रीशं वन्दे ॥ begins E only.
[2] सचिन्तो om Mg only
[3] भोः Cu, K भो भो E भो cett
[4] °स्ताडकेयं K, Md °स्ताटकेयं corr to °स्ताडकेयं Cu °स्ताटकेयं cett (+Mt, Mg)
[5] °वद्ध्यधूनोत् for °वद्व्यधूनोत् W only
[6] ताडका° K, Md ताटका° corr to ताडका° Cu ताटका° cett (+Mt, Mg)
[7] तां W मे Mg मां cett
[8] तदनुज्ञवानां च भूयसां om Mt only
[9] लक्ष्मणेनै° for क्षणेनै° Mt, Mg only
[10] किमेतदित्था° for किमेतदा° Sc only
[11] द्वैधं for द्वैधं E only
[12] नरुषः for धनुषः Md only.
[13] अपि च add. Md only
[14] रावणद्विष्ट° corr. to रावणद्विष्ट° W रावणादिष्ट° Bo रावणद्वेष° Mg रावण-द्विष्ट° cett.
[15] कालेव for काले E only

यतः[1] ।

सीतावन्दियहपरिभवस्तस्य राज्ञो निरस्तो[2][3]
नीतं चास्मान्प्रति शिथिलतामेकमुख्यं सुराणाम्[4] ।
नान्दीनादप्रभृति[5] हि कृतं मङ्गलं तैस्तदानीं
सर्वं[6] प्रायो भजति विकृतिं भिद्यमाने प्रतापे ॥४॥

कथं वत्सा शूर्पणखा[7] प्राप्ता[8] ॥

प्रविश्य शूर्पणखा[9] । जेदु[10] जेदु[11] मादामहो ॥[11a]

माल्य० । वत्से आस्यताम् । का राजसन्निधौ वार्ता ॥

शूर्प[12] । णिवुत्ताइं[13] किल तहिं पाणिग्गहणाइम्[14] । अणं[15] च । अगत्थिमहेसिणा[16] रामस्स[17] मङ्गलोवहारिअं[18] माहेन्दं[19] धणुवरं अणुप्पेसिदम्[20][21] ॥

---

[1] यतः om Mg only

[2] °बन्धि° Cu °वन्दी° Md, Mt, Mg °वन्दि° cett

[3] निरासो for निरस्तो Mg only.

[4] नीता for नीतं $I_1$ only.

[5] °प्रभाव for °प्रभृति Bo only.

[6] सर्वः Mt, Mg सर्व Bo सर्व cett

[7] सूर्पणखा Cu, K सूर्पनखा Md शूर्पनखा E शूर्पणखा cett. (+ Mt, Mg)

[8] प्राप्ता । प्रविश्य शूर्पणखा om K only The same by rev along margin, Cu.

[9] शूर्पनखा E सूर्पणखा Cu सूर्पनखा Md शूर्पणखा cett (+ Mt, Mg).

[10] जेदु corr. to जेदु२ by rev., Cu जेतु२ W जेदु जेदु cett.

[11] कणिट्ठ° add. Mg only.

[11a] जयतु२ मातामहः add *chāyā*, Sc

[12] सूर्प° Cu, K, Md शूर्प° cett (+ Mt, Mg)

[13] णिडत्ताइ W णिवुताहिं E णिवुत्ताइं cett

[14] पाणीग्गहणाइं $I_1$ पाणिगाह Bo [illegible]णाइं E पाणिग्गहणाइं corr to पाणिगाहणाइं Cu पाणग्रहणाइं Sc, $I_2$ पाणग्गह[illegible] W पाणिग्गाहणाइं Md पाणिग्गहणाइं K

[15] अणं $I_1$, Bo, E अणं cett.

[16] अगथि° E, Sc, $I_2$ अगत्थि° cett

[17] °मेहिसिणा $I_1$ °मेसिणा Bo °महेसिना Md, Mt °मेहेसिणा K °महेसिणा cett

[18] °लोवहारिअ orig changed to °लोहारिअं Cu °लोवहारिय W °लोवहारिअं cett

[19] माहेन्दं K माहेदं E माहिन्द Cu, [Bo माहिन्द cett

[20] धणु अरं W, Sc धणु (वर om) $I_2$ धनू E धणुवरं Md, Mt, Mg धणुवरं cett

[21] पेसिदं E प्पेसिदं $I_2$, Md, Mt, Mg अणुप्पेसिदं cett निर्वृत्तानि किल तत्र

माल्य°। यानि[1] भुवनेष्वतर्क्यसामर्थ्यान्यायुधानि तानि[2a] रामे ब्रह्मर्षिभ्यः परिणमन्ति ॥ सचिन्तम्।

अमोघमस्त्रं क्षत्रस्य ब्राह्मणानामनुग्रहः।
दुरासदं च तत्तेजः क्षात्रं च[6] ब्रह्मसंयुतम् ॥५॥

सूर्प°। माणुसमेत्तए वि एत्तिए का चिन्ता ॥

माल्य°। वत्से मा मैवम्।

उत्पत्त्यैव हि राघवः किमपि तद्रूपो जगत्यद्भुतं
मर्त्यत्वेन किमत्र यस्य चरितं देवासुरैर्गीयते।
वस्तुष्वादधते च शक्तिमृषयो देवाश्च तर्कोत्तरां
मर्त्यादेव वरप्रदानसमये ब्रह्मा भयं नो जगौ ॥६॥

अपि च।

निसर्गेण स धर्मस्य गोप्ता धर्मद्रुहो वयम्।
अर्थ्यो विरोधः शक्रेण जातो नः प्रतियोगिना ॥७॥

---

पाणिग्रहणानि। अन्यच्च अगस्तिमहर्षिणा रामस्य मङ्गलोपहारिकं माहेन्द्रं धनुर्वर प्रेषितम् add. *chāyā*, Sc

[1] यानि add. Mt only

[2] °ष्वतर्क्य° I$_1$, K, Md °ष्वमर्त्य° Bo, W, Sc, I$_2$, Cu (corr fr °ष्वतर्क्य°) °ष्वन्तर्गत° E °ष्वप्रतर्क्य Mt [Mg

[2a] तानि add Mt अधुना तावत् add.

[3] ब्रह्मऋषि° for ब्रह्मर्षि° Bo only [cett

[4] सचितं E सञ्चितं W, Cu सचिन्तं

[5] °वस्त्रं for °मस्त्रं Bo only

[6] यत् for च Mt only

[7] सूर्प° K, Md भूर्प° cett. (+ Mt, Mg)

[8] माणस° Bo माणूस° W, Sc माणुस° cett

[9] एत्तिआ K एतिए Cu, Sc एतिइ W खतिए for वि एत्तिए E एत्तिए cett मानुषमात्रकेऽस्थितस्मिन् का चिन्ता add *chāyā*, Sc

[10] तद्भूयो I$_1$, E, I$_2$, Md तद्भूपं Bo, K तद्रूपो W, Sc तद्रूपं corr. to तद्भूयो Cu तद्भूतं Mg Reads राघवस्य चरितं तत्तत्किमप्यद्भुतं for राघवः.... जगत्यद्भुतं Mt

[11] °मस्य for °मत्र Mt, Mg only

[12] देवादिभि° for देवासुरै° E

[13] तर्कोत्तरा I$_1$, Cu, Mt, Mg तर्कोत्ततः Bo तर्कैतरां E, W तर्कतरां Sc तक्तरा I$_2$ तर्कोत्तिमा Md तर्कैत्तरा K

[14] आर्थो K अर्थो Bo, E, Sc, Mt अथो W अर्थ्यो cett.

[15] °योगिनः corr to °योगिना E °योगिनः corr to °योगिनां W °योगिन corr to °योगिना Cu °योगिनः Mt °योगिनां Sc °योगिना cett

[1]सूर्प°। को सन्देहो। [2]जह दसमुहो ईसिमउलिएहिं विंसदि[3]दिट्ठीहिं [4]ओहीरमाणलोल[5]लोअणो णमन्त[6]वदणो वट्टदि [7]तह जाणामि दारुणो से[8] हिअअवेअणावेओ ण[9] [10]एवं विरमिस्सदि [11][12]त्ति ॥

माल्य°। अहो नु खलु भोः।

वन्द्या विश्वसृजो युगादिगुरवः स्वायम्भुवाः सप्त ये
वैदेहस्य वयं च ते च किमहो सम्बन्धिनो न[13] [14]प्रियाः।
[15]तन्नामास्तु दुरासदेन तपसा दीप्तस्य दीप्तश्रियः
पौलस्त्यस्य जगत्प्रतेरपि कथं जाता हृदि न्यूनता ॥८॥

[16]अथवा।

[17]अर्थित्वे प्रकटीकृतेऽपि न [18]फलप्राप्तिः [19]प्रभोः प्रत्युत
दुह्यन्दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया।
[20]उत्कर्षे च परस्य मानयशसोर्विध्वंसनं चात्मनः
[21]स्त्रीरत्नं च जगत्पतिर्दशमुखो दृप्तः कथं मृष्यते ॥९॥

---

[1] सूर्प° Cu, K, Md शूर्प° cett (+Mt, Mg)

[2] जहा Cu, K जह cett

[3] विंसदिदिट्ठीहि K विसदिट्ठीहि $I_1$, W, Sc, Md विसदिट्ठीहि Bo विंसदिट्ठीहि $I_2$ वीसदिट्ठिहि E विदिहिं corr to वीसदिट्ठिहिं Cu.

[4] उहीर° Cu ओहिय° E ओहीर° cett

[5] लोअलोअणो E लोलअणो $I_2$ लोललोअणो cett.

[6] °वअणो K °वदनो Md °वदणो cett णमन्तवदणो om Bo only

[7] तही Cu तहा K तेह $I_2$ तह cett.

[8] सि for से $I_2$ only.

[9] से add. Md only.

[10] एवं for एव्वं Md, Mt, Mg only.

[11] विरमस्सहि for विरमिस्सदि E only

[12] ति E, W, Sc त्ति cett. कः सन्देहः यद्दशमुखोऽपीषन्मुकुलिताभिर्विंशद्दृष्टिभिरपह्रियमाणलोललोचनो नमद्वदनो वर्तते। तज्जानामि दारुणोऽस्य हृदयवेदनाविगो न एवं विरमिष्यति add *chāyā*, Sc. [न cett

[13] न changed to नः Cu ये for न Mt

[14] प्रियः for प्रियाः Cu only

[15] तन्नामास्तु corr to तन्नामास्त्र Cu only

[16] अथवा om K, Bo, Mg अथवा by rev, Cu अथवा cett

[17] प्रगटी° for प्रकटी° E only.

[18] फले for फल° E only

[19] प्रभो for प्रभोः Cu only.

[20] उत्कर्षे Md उत्कर्ष Bo उत्कर्षे cett. (+Mt, Mg)

[21] स्त्री° by rev., Cu.

नेपथ्यार्धप्रविष्टः प्रतीहारः[2] । यः परशुरामस्य युष्माभिर्वीर्तोहरः प्रहितः तेनेदं तमालरसविन्यस्ताक्षरं तालीपत्रमुपनीतम् ॥

[8]उपविश्य निष्क्रान्तः ॥

माल्य० । गृहीत्वा वाचयति ॥ "स्वस्ति । महेन्द्रद्वीपात् परशुरामो लङ्कायाममात्यं माल्यवन्तमभ्यर्हयति" ॥

[13]भूर्प० । कहं पहु व[14] दुस्सिलिट्ठक्कमं लिहदि ॥[15]

माल्य० । [16]"अत्रैव परममाहेश्वरं लङ्केश्वरमभिनन्द्य ब्रवीति । विदितमेतद् वो यदस्माभिर्दण्डकारण्यतीर्थोपासकेभ्यस्तपोधनेभ्यः प्रतिज्ञातमभयम् । तच्च विराधदनुकबन्धप्रभृतयः केऽप्यभिचरन्तीति श्रुतम् । तत् तान् प्रतिषिध्य सद्वृत्तिमस्मद्धितां च माहेश्वरीं प्रीतिमनुरुध्यन्तां भवन्तः ।

---

[1] नेपथ्येऽर्ध० E, K नेपथ्यर्ध० corr to नेपथ्यार्ध० Cu नेपथ्ये (om अर्ध) W नेपथ्यार्ध० cett.

[2] २ added by rev, Cu only

[3] °रामाय for °रामस्य E only

[4] °हरः K, Bo °हरः corr to °हारः Cu °हारः cett

[5] प्रेषितः for प्रहितः Md, Mt, Mg only.

[6] विन्यस्ता० for विन्यस्ता० W only.

[7] ताची० for तालो० W only

[8] इति add. Bo only.

[9] उत्क्षिप्य Bo उपेक्षिप्य E निक्षिप्य Mg उत्क्षिप्य Md उपक्षिप्य cett (+Mt)

[10] निःक्रान्तः Cu, K, Bo, Md निष्क्रान्तः cett. (+Mt, Mg)

[11] °द्विपात् for °द्वीपात् E only.

[12] लङ्कापत्यमात्यं for लङ्कायाममात्यं E only

[13] सूर्प० K, Md भूर्प० om. $I_2$ भूर्प० cett (+Mt, Mg)

[14] पङ्कव्व दुस्सिलिट्ठक्कमं $I_1$ पङ्कवदुस्सिलट्ठक्कमं Bo पङ्कव्वदुस्सिक्कमं corr to पाङ्कदिदुस्सीलविक्कमं Cu पङ्कव्वउस्सिलिवुक्कमं W पङ्कघट्टुस्सिलिवुक्कमं $I_2$ पङ्कघढस्सिलिवुक्कमं Sc वुद्धुठसिलिटकम E पङ्कव्वतुस्सिलिट्ठक्कमं K पङ्कव्वदुस्सिठ्ठक्कमं Md. [*chāyā*, Sc.

[15] कथं प्रभुगृहश्रीव्युक्रमं यथातथा add.

[16] शेषं वाचयति add Mt, Mg only

[17] °वं Bo, W °व cett

[18] °मधिक्षत्य for °मभिनन्द्य Mt only

[19] °यतिचर० Mt °यचर० E °यभिचर० cett

[20] प्रतिनिविध्य for प्रतिषिध्य E only.

[21] तद्वृ० for सद्वृ० Mt only.

[22] महेश्वरप्री० $I_1$, E, $I_2$ माहेश्वरप्री० Sc, Md माहेश्वरीप्री० Bo माहेश्वरीं प्री० Cu, K माहेश्वरीप्री० corr to माहेश्वरप्री० W.

[23] °रुद्धन्तां Cu °रुध्यन्तु Mt °रुध्यतां E °रुध्यन्तां cett

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥१०॥

इति ॥

[1]सूर्प०। [2]ईसिमसिणावट्टम्भगम्भीरगमओ उवणासो ॥

माद्य०। [4]अहो किमुच्यते। जामदग्न्यः [5]खल्वसौ।

अभिजननतपोविद्यावीर्यक्रियातिशयैर्निजै-
[6]रुपचितशमः सर्वत्यागान्निरीहतया [7]स्थितः।
[8]व्यपदिशति नः शैवप्रीत्या कथञ्चिदनास्यया
प्रभुरिव[9] पुनः [10]कार्ये कार्ये भवत्यतिकर्कशः ॥११॥

इति चिन्तयति ॥

[12]सूर्प०। किं[13] [14]चिन्तीअदि[15] ॥

माद्य०। वत्से।

यदि प्रपद्येत धनुःप्रमाथः[16]
शिष्याय शम्भोर्न तितिक्षते सः[17]।

---

[1] सूर्प० Cu, K, Md शूर्प० cett (+Mt, Mg). [Bo only

[2] इंसिणाविदब्भ० for ईसिमसिणावट्टब्भ०

[3] गम्भीरगम्भी उवणासो $I_1$, Cu, K (but has space for ओ) गम्भीरगम उवणासो Bo गम्भीरगमओ उव्वंणासो E गम्भीरगुरुओ वणासो Sc गम्भीरगुरुओ वणासो W गम्भीरगओ उवणासो $I_2$ गम्भीरगुरुओ वणासो Md [illegible]-वट्टब्भगुरुदप्पन्यासः add. *chāyā*, Sc.

[4] असौ for अहो Mg only

[5] °ल्वसौ for °ल्वसौ W only.

[6] °मद: in orig, has also शूमः above it by rev., Cu °मदः K °शूमः cett,

[7] °तपः for °तया E only

[8] अप० for व्यप० E only.

[9] च add W only

[10] Om one कार्ये Md only कार्ये in orig, but २ above it by rev, Cu.

[11] भवत्यर्कशः E भविष्यति कर्कशः Mt भवत्यतिकर्कशः cett [Mg)

[12] सूर्प० Cu, K, Md शूर्प० cett (+Mt,

[13] किं K, E, Bo किं corr to किं२ Cu किं किं cett

[14] दाणिं add Mg only

[15] चिन्तीअदि $I_1$, Md [illegible] Bo चिन्तीयदि Cu चिन्तअन्दि E चिन्तेअदि W, Sc चिन्तीआदि $I_2$ चिन्ती दि K किं चिन्त्यते add. *chāyā*, Sc.

[16] °प्रमाथं Mt °प्रमाथी Mg °प्रमाथः cett. [above it, Sc

[17] शूः corr. to सः, and जाम in red ink

आयोधने[1] चेदुभयोर्निघात[2]ः
संरम्भयोगादति हि प्रियं[3] नः ॥१२॥

[4]अन्यतरविजयेऽपि[5] तु क्षत्रियान्तकरश्चेद्[6] राजपुत्रं विजयते [7]नैनमनभिहत्य[8] रोषणो[9] विरमेत्[10]। एवं[11] च सिद्धं नः समीहितं[12] 5 रामनिधनम्। ऐक्ष्वाकस्तु[13] विजयमानो[14] ब्रह्मण्यो[14a] न ब्रह्मऋषिम[15]भिहन्यात्। निः[16]श्रेयसापन्ने[17] [17a]अपसृतमपि[18] शस्त्रं प्रणिदध्यात्। एवं च[19] दुष्टतरं[20] स्यात् ॥

[21]सूपः। को विसेसो[22] ॥

माध्यः। यदि जामदग्न्यस्तावदारण्यं[23]कव्रतो हन्याद् राघवं हत्वापि 10 पुनस्तादृश एव[24]। सन्धार्यस्तु[25] राजपुत्रः पुनरुत्थातुकामः[26]। तं चेत्

---

[1] आयोधनं for आयोधने $I_2$, Md only
[2] °र्विघातः for °र्निघातः E only
[3] प्रयत्नः for प्रिय नः K only.
[4] राजा add Cu only.
[5] ऽपि om E only
[6] °न्तकश्चेद् for °न्तकरश्चेद् Mt only
[7] यतो add. W, Sc only
[8] °भिहत्य for °भिहत्य Md only.
[9] रोषेण for रोषणो Mt only.
[10] °रमेत for °रमेत् Cu only.
[11] एव for एवं E only.
[12] समाहि° for समीहि° Md only.
[13] एत्वा° K, Bo, Md ऐत्वा° cett (+ Mt, Mg).
[14] °कश्चेद् for °कस्तु Mt, Mg only.
[14a] ब्राह्मण्यो W only ब्रह्मण्यो cett.
[15] ब्रह्मऋषि° corr. to ब्रह्मर्षि° Cu ब्रह्मर्षि° E, Bo ब्रह्मरिषि° Md ब्रह्मऋषि° cett (+ Mt, Mg)
[16] निःसमसा° corr. to निःअयसा° Cu निःश्रेयसा° cett
[17] °पन्नं for °पन्ने Mt only
[17a] परित्यक्तमित्यर्थः add K only.
[18] अस्त° Bo अपस्रजन्त° E अपस्त° cett विप्रवृत्तं हीनशस्त्रं for अपस्तमपि शस्त्रं Mt only
[19] नो add Mt, Mg only
[20] अनिष्ट° for दुष्ट° Mg only
[21] सू° K, Sc, $I_2$, Md, W शू° cett. (+ Mt, Mg).
[22] को विशेषः add. *chāyā*, Sc
[23] °द्दारण्यव्रतो Cu, K °द्दरण्यतो W °द्दरण्यरतो E, Sc, $I_2$ °द्दारण्यव्रतो cett.
[24] Add a stop all but Cu, E, $I_2$ only
[25] सङ्घायेत्तु राजपुत्रः corr to सन्धार्यस्तु राजपुत्रः Cu सन्धार्यते राजपुत्रस्तु Mt सन्धार्यस्तु राजपुत्रः cett
[26] °त्थान° for °त्थातु° K only

प्रकृष्टतममुत्साहशक्तिसम्पदा धर्मविजयिनं विजयेत सर्वे तं विजयिनमनुजानीयुः । तदैव हठाक्रान्तिनित्यनिभृतक्रुद्धा देवा प्रसह्यैनमधिकुर्युः । नित्यानुषक्तो ह्यसुरविजयिनामवमानतः प्रकृतिकोपः ।

पौलस्त्यापचयप्रचण्डचरिते यः कार्तवीर्ये मुनिः
सर्वक्षत्रकथासमापनविधेः प्राङ्मण्डलं प्राकरोत् ।
तस्मिन्नप्युपनीतयुक्तदमनः स्यादुज्झितासक्रिये
सामर्थ्ये सति धर्मसौम्यचरितो विश्वस्य रामः पतिः ॥१३॥

भूयः । तदो एत्थ दाणिं किं चिन्तिदम् ॥

---

[1] प्रह्वष्टमन्युमु° K प्रह्वष्टतममु° corr to प्रहृष्टतममु° Cu प्रहृष्टतममु° $I_1$ प्रहृष्टतममु° cett

[2] धर्मविजयिनं om. Mt only

[3] च add. Mg only

[4] °जयेत् for °जयेत W only विजयेत सर्वे तं विजयिनम् om E only

[5] °यिनमनुजानीयुः K, W, Sc °यिनं निर्जरा जानीयुः Mt °यिनमनुर्जानीयुः corr to °यिन निर्जानीयुः Cu °यिनं निर्जानीयुः cett

[6] हठाक्रान्तिनित्य° K, Bo, Mg हठाक्रान्तिनित्य changed to हठात्क्रान्तिनित्य° Cu हठाक्रान्त्या° E, Sc हताक्रान्त्या° W हठाक्रामत्य° $I_1$, $I_2$ हठात्क्रामत्य° Md.

[7] °क्रुधा for °क्रुद्धा Md, Mt, Mg only

[8] प्रत्यहीत° for प्रसह्यैन° Bo only.

तथा रणेष्वद्भुतवीरगोष्ठी-
भूषायमाणो दशकन्धरोऽपि ॥४३॥

चित्र०। देवराज बहुभिरेकस्याभियोगेऽपि शुभोदर्कतेत्येतद्बहुव्यक्तिनिष्ठम्[5]। सचमत्कारम्। इतोऽवधत्तां[6] देवराजः।

रक्षोनाथे सरभसमितो निर्गते विग्रहेच्छुः
क्षुभ्यत्युच्चै रघुपतिशरैः कीलितः कुम्भकर्णः।
कुम्भोऽप्येतां पितुरुपनतां वीक्ष्य वस्थां वपुष्मान्[7]
गर्वः किं वा निपतति[8] जवाज्जङ्गमः क्ष्माधरेन्द्रः॥४४॥

---

[1] °शङ्का for °शङ्की E only

[2] रभसात् for तरसा K only.

[3] काकु° for कक्षु° E only.

[4] °सहस्र° for °सहस्रं° E only [only.

[5] °दर्कानि एतद्° for °दर्कतेत्येतद्° E

[6] इतो धावता for इतोऽवधत्ता E only.

[7] वपुष्मान् गर्वः K, W, Sc, B वपुष्मानार्तः E चपुष्मान् वेगः $I_2$.

[8] वा निपतति K, W, Sc, $I_2$, B वापि पतति E

समन्तात्। अहो छिद्रसञ्चारिता[1] मर्कटजातेः। यतः।

उद्दिश्याराद्दशरथकुलाङ्कूरमाद्यं पतन्तं
[2]दृप्तं कुम्भं मृधभुवि कपिः कोऽपि मध्ये रुरोध।

सविशेषं निर्वर्ण्य। कथं सुग्रीव एव। सविचिकित्सम्।

दोःस्तम्भाभ्यां सरभसमथापीड्य विक्षिप्य भूमौ
क्रान्त्वाप्येनं प्रतिघविवशं[3] माषपेषं[4] पिपेष ॥४५॥

साशङ्कम्।

[5]एतन्निरीक्ष्य निपपात च कुम्भकर्णः
सुग्रीवमुग्रतरविद्युतिरग्रहीच्च।
उन्मोच्य सोऽपि निपुणः स्वममुष्य नासां
लज्जां स्वसुश्च युगपत् किल निश्चकर्त्त ॥४६॥

वास°। गन्धर्वराज इत[6] इतः॥

लघुरघुपतिरेष राक्षसाना-
[7]मधिभुवि किं च कुमारमेघनादे।
किमपि चरित[9]मद्भुतं व्यतानीत्
सपदि यथा प्रतिघान्धतामधा[10]ताम् ॥४७॥

अहह। इदमतिदुष्करं[11] प्रतिसंविधानमापतितमस्य रघुशिशोः। तथा हि।

---

[1] °चारता for °सञ्चारिता E only.
[2] दृप्तं B, E, K सप्तं $I_2$ सत्वं W, Sc
[3] कोपक्रोधामर्ष [illegible] द्क्रुधौ स्त्रियौ added along margin by Sc
[4] °विवशं E, K °विवशो cett
[5] एवं निरी° for एतन्निरी° E only
[6] इत om K only
[7] °मपि भुवि E °मधिभुवि cett.
[8] °नादे B, E, K, $I_2$ °नादं W, Sc.
[9] °ताद्भुतं for °तमद्भुतं W only.
[10] °मधाता B, K, $I_2$ °मधत्तं corr. to °मधातं W °मधत्तं E °मधात्तं Sc.
[11] °दुष्करं E, K, $I_2$ °दुष्कर° W, Sc °दुकर° B.
[12] प्रतिसंविधान° W, Sc, K, B प्रतिसान्धान° E प्रतिशंविधान° $I_2$.

यावन्मन्त्रप्रभावाद्दुरधिगमगतीन्[1] मेघनादप्रणुन्नानपि नि-
दुर्भेद्यान्नागपाशान् विहगपरिवृढास्त्रप्रयोगाद्धुनोति[2] ।
तावद्रक्षोविनेचा पुनरतिरभसं मर्मणि क्रोधभूम्ना
गाढं विद्धः शतघ्न्या[3] हनुमति सहसा मोहनिघ्नो[4] न्यप-
पद्यत ॥ ४८ ॥

चित्र°। देवराज अयमचाद्भुततरो विमर्दः। यदा तु भ्रातुर्मोहमधिगम्य भाविलङ्केश्वराद्[5]क्रममेव करुणवीरानुभावभावितचित्तवृत्तिस्तथाविधस्यापि दर्शनोत्सुकः समरुध्यत[6] परितः कुम्भकर्णप्रमुखया[7] रक्षःपृतनया तदा पुनरिदमेव प्रत्यकार्षीत्। तथा[8] हि।

पुरां[9] जेता[10] पूर्वं त्रिपुरविजये यामुदवहत्
स्थितिं तामेवायं[11] रघुपतिवृषाश्रित्य वपुषा।
क्षणाद्रक्षोनाथानुजमिषुभिराच्छिद्य कणश-
श्चमूं भस्मीकृत्याप्यनुजमभियात्युत्सुकतमः[13] ॥ ४९ ॥

निर्वर्ण्य। अहो[14] वात्सल्यमहिमा रघुपुङ्गवस्य येन पुनर्विषयीकृतमाचामेवानुजस्यावस्थामभिजानाति[15] स्म। परितो निरूप्य। सहर्षम्। दिष्ट्या स्वस्ति रघुकुलकुमाराभ्यामेताभ्यामुत्पश्यामि यतस्तावदेत-

---

[1] °दुरधिगमगती° K °दुरधिगमगती° B °दुरधिगमनती° E °दरधिगमगती° $I_2$ °दनधिगमगती° W, Sc

[2] °वृढोऽस्त्र° E, $I_2$ °वृढास्त्र° cett

[3] शतघ्यां E शतघ्या cett

[4] °निघ्नोऽभ्यपद्यत B °नघ्नोन्यपद्यत K, E, $I_2$ °निघ्नेऽभ्यपद्यत W, Sc.

[5] °राद्क्रममेव B, E, K °रदक्रममेव $I_2$ °रदत्तक्रममेव Sc °रचक्रममेव corr. to °रदत्तक्रममेव W.

[6] समरुध्यते B समरुरुध्यत E समरुध्यत K, W, Sc, $I_2$.

[7] °मुखया E °प्रमुखया cett.

[8] तथा हि om. B only

[9] पुरां K, E, W पुरा B, $I_2$ पुरं Sc.

[10] जिता Sc जेता cett.

[11] °मेवाद्यं W °मेवायं cett.

[12] °नाथोऽनुज° E °नाथानुज° cett.

[13] भक्षीकृत्वानुज° B, K, Sc, $I_2$ भक्षीकृत्यानुज° W भक्षीकृत्वाप्यनुज° E.

[14] अवो E अहो cett

[15] °माचाभवे अनुज° E °माचामेवानुज° cett

योऽस्मिन्[1] व्यसनमहार्णवे यातुधानाधीशेनापि सपरिवारेण कुम्भकर्णवधात् सम्भ्रान्तम्[2]। पुनरेतौ निर्वर्ण्य। कथमद्यापि प्रमुग्धावेव। विषमो व्यसनव्यतिकरस्तावदापतितः[3]। यतः।

बहुच्छलानि रक्षांसि रिपवस्तूवरौ[4] स्वयम्।
एषावस्थापि[5] कपयः सहायास्तेऽपि विक्लवाः ॥५०॥

तत् किमुपक्रमं दैवमचेति[6] न जाने[7] ॥

वास०। गन्धर्वराज किमेवमाशङ्कसे। पश्य। जाम्बवत्प्रतिबोधितः[8] किलायमचिन्त्यमहिमप्रथिमा[9] प्राभञ्जनिः। सम्प्रति[10]

उत्स्फूर्जद्रोमकूपः[11][12] प्रलयपरिमिलत्पांसुवर्षानुकारी[13]
किञ्चिद्भुग्नाग्रपुच्छाप्रतिमविवलनापास्तनक्षत्रचक्रः[14][15]।
भूम्नौत्सुक्यानुरूपव्यवसितिरधिकं पर्यवप्लुत्य[16] गत्वा
क्वापि प्राज्ञः क्षणार्धात् कमपि गिरिमसावाहरन्नाजगाम[17]
॥५१॥

---

[1] °रस्मिन् B °रन्यस्मिन् cett.

[2] °व्यसन° om. B only

[3] विषमो व्यसनव्यति° B, E, K विषमो व्यनव्यति° $I_2$ विषमे ध्यानव्यति° W, Sc.

[4] °वस्तूवरौ B, K °वस्तवरौ $I_2$ °वसु वरौ E °वस्तवशे Sc °वस्त्ववशौ W

[5] एषवस्था° E एषावस्था° cett.

[6] देव° E दैव° cett.

[7] ज्ञायते B जाने cett.

[8] जाम्बवत्प्रति° B जाम्बत्प्रति° K जीववत्प्रति° E, Sc, $I_2$ जीवत्प्रति° W.

[9] °महिमप्रथिमा B, E, K °महिमा प्रथमा $I_2$ °महिम्ना प्रथमः W °महिम्नां प्रथमः Sc

[10] हि add E only

[11] प्रस्फूर्ज° K उत्स्फुर्ज° E उत्स्फूर्ज° cett.

[12] °कूपः W, Sc, E °कूप B, K, $I_2$

[13] °त्पांसु B, E, Sc, $I_2$ °त्पांशु W, K

[14] °ङ्गुमाङ्ग° E °ङ्गुमाग्र° cett

[15] °विवकरा° B °विवलना° cett.

[16] पर्युम्पल्युत्य E पर्यवप्लुत्य cett.

[17] °मसौ वाहयन्ना° B °मसावाहरन्ना° cett

चिच°। विभाव्य। सोल्लासम्। देवराज पश्य[1] पश्य।

यथा चन्द्रालोकं कुमुदनिवहश्चुम्बकमणिं
दृषत्सारस्तत्त्वामृतमपि भवाम्भोनिधिगतः[2]।
तथा सम्भाव्यैतौ[3] हनुमदुपनीताद्रिमरुतं
झटित्युज्जृम्भेते[4] किमपि गहनो वस्तुमहिमा ॥५२॥

दक्षिणतो विभाव्य। कथमेष लङ्केश्वरः कल्पावसाननिर्मर्यादं[5] पाथ[6] इव पाथोनाथस्य राक्षसबलमाकर्षन्[7] पुनरभ्यमित्रमभ्येति[8][9]। विमृश्य। सम्प्रति तु धर्मयुद्धसम्भावना[10]। प्रतिहतबहुतरप्रधानव्यक्ति रावणमेघनादशेषमेतद्राक्षसबलमेतावप्युभौ[11][12] न[13] गणयेते किं[13a] पुनः पर:सहस्रमप्यस्मत्कपीटाः। पुनर्लक्ष्मणं निर्वर्ण्य। एष[14] तु

शाणोत्कीर्णो मणिरिव घनाम्भोदमुक्तो विवस्वान्
निःकोशोऽसिर्झटितिविगलत्कञ्चुकः पन्नगेन्द्रः।
दीप्यत्युच्चैर्लघुरघुपतिः[15][16] किं नु वा स्यात् किमन्यद्
दिव्यौषध्या जयति[17] महिमा कोऽप्यचिन्त्यानुभावः ॥५३॥

---

[1] पश्य पश्य B, E पश्य only, cett

[2] °रस्तत्त्वामृत° K °रस्तत्वामृत° B °रस्तत्वां मृत° E °रस्तत्वामृत्वामृत° $I_2$ °रःस्तुत्वामृत° W °रसुत्वामृत° Sc.

[3] °भ्यैतौ $I_2$ °भ्यैतौ cett

[4] °भन्ते E, W °भेते cett.

[5] कल्पना° $I_2$ कल्पा° cett.

[6] पाथ्य W पाथ cett

[7] °बलमाकर्षन् B, K, Sc °बलं माकर्षत् W, $I_2$ °बलप्रकर्षन् E.

[8] °भ्यमित्रम° B, E, K, $I_2$ °भ्यमित्र्यम° W °भ्यमित्रम° changed to °भ्यमित्र्यम° Sc Added along margin· जैचस्तु जेता यो गच्छत्यन्तं विद्विषतः प्रति। सोऽभ्यमित्र्यो ऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि Sc

[9] °मध्येति corr to °मभ्येति W.

[10] °वना। प्रति° B °वनाप्रति° cett.

[11] रावण E, $I_2$ रावण° K, W, Sc, B

[12] °बलमेतावप्युभौ B, E, K, $I_2$ °बलमेताभ्यामवगणितमित्येतावप्युभौ W, Sc

[13] गण्येते B गण्यन्ते K, W गणयन्ते E, Sc, $I_2$.

[13a] किं पुनः om. all but E, K

[14] एष B, E, K एवं W, Sc एव $I_2$

[15] घनान्तादिमुक्तो B घनाभ्रामुक्तो E घनाम्भोदमुक्तो K, W, Sc, $I_2$.

[16] दीव्य° K, E, Sc, $I_2$ दिव्य° W दीप्य° B.

[17] जगति E जयति cett

निरूप्य। कथं प्रक्रान्तमेव कपिराक्षसनासीरचरयोर्भटयोः पुनरायोधनम्। तथा हि।

[1]शितैर्वाणैरेके मृधभुवि परे तीक्ष्णनखरैः
क्रियासातत्येनाप्यहमहमिकाक्रान्तमनसः।
मिथो विध्यन्ति स्म[4] प्रबलतमसम्मर्दविदलत्-
[5]क्षितिक्षोदैः पिष्टातकसुरभिवक्षस्तटभृतः ॥५४॥

सविशेषं निश्चित्य। तावदन्तरमनयोर्बलयोरधिगंस्यमानप्रातःसन्ध्ययोर्यावदन्धतमसारुणालोकयोः। तथा हि।

प्रतिक्षणमियं रक्षःपृतना क्षीयतेतराम्।
[9]तथा तथा प्लवङ्गानां सेनानन्तगुणैधते ॥५५॥

वास°। गन्धर्वराज पुनरितो महत् कदनमुपक्रान्तम्।

रक्षोनाथो रघूणां त्वरितमधिभुवा रावणिर्लक्ष्मणेन
द्वन्द्वीभूय प्रहृष्यद्भुजबलमहिमाविष्कृतेष्वासशिक्षौ।
दिव्यास्त्राणां प्रयोगं[13] प्रतिकृतिमुचितां चाश्नुवानौ मिथोऽमू
मूर्छत्कल्पावसानज्वलनपरिभवं सैन्ययोः पर्यदाताम् ॥५६॥

---

[1] शितै° E, $I_2$ शितै° cett

[2] Added along margin अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः Sc

[3] विन्ध्यन्ति E, W विध्यन्ति cett

[4] स्व E स्म cett

[5] °क्षितिक्षोदै K °क्षितिक्षोदः W, Sc, $I_2$ °क्षमाधूली° B

[6] पिष्टातक° K, Sc, $I_2$ पिष्ठातक° W पिष्टान्तक° B पिष्टात° E. Also added along margin पिष्टातः पटवासकः इत्यमरः Sc.

[7] °दन्तरसेनयोर्बलयो° B °दन्तरमनयोर्बलयो° cett [°गम्यमानं W, Sc.

[8] °गंस्यमान° B, K, $I_2$ °गम्यमान° E

[9] तथा B, E, K, $I_2$ यथा W, Sc.

[10] °नां सेनानन्तगुणैधते B °ना तच गुणैधते K °ना त गुणैधते E °नामनन्तगुणैधते W, Sc °नानन्तगुणैधते $I_2$

[11] °तेष्वास° E °तेष्टास° K °तश्वास° B °तेश्वास° prob corr to °तेष्वास° W °तेश्वास° Sc, $I_2$

[12] शस्त्रा° B दिव्या° cett

[13] प्रयोगं B, E, K, $I_2$ प्रयोग° W, Sc

[14] चाश्नुवानौ B चाष्णुवानौ K, $I_2$ चाप्नुवानौ W, Sc चाष्णुर्वानौ E

[15] पर्यदातां K, $I_2$ पर्यदात्तां W, Sc पर्यटातां E पार्षदानौ B

चिच°। देवराज[1] दुरवबोधोऽयमनयोर्महावीरयोर्[2]मिथोविमर्दः। तथा हि।

क्ष्वेडाभिः[3] ककुभः[4] पृषत्कनिकरैर्व्योम द्विधाखण्डितै-
र्देहैर्विद्विषतां धरातलमपि प्रच्छादयन्तौ चिरम्[6]।
कुर्वाते ऽश्रुजलाविलेक्षणपथान्येतावकाण्डोच्चर-
द्रोमाञ्चानि[7] सवेपथून्यपि मुहुर्वर्ष्माणि नः पश्यताम्
॥५७॥

सविशेषं विभाव्य। कथं प्रत्यक्षानुमानाभ्यामुपलभ्यमानमेकमेव[8] वस्तु विप्रकृष्टान्तरं[9] सम्पद्यते। तथा हि।

अस्माद्[10] रावणवृत्ताद्[11] राघववृत्तं तु दशगुणं वीक्षे[12]
अनुमन्येऽनन्तगुणं पार्श्वपतत्कौणपेन्द्रविनिपातैः ॥५८॥

परितो निरूप्य। सकुतुकाश्चर्यम्।

यावन्तो रजनीचराः प्रहरणोर्णाङ्कजाकेतवो[13]
युध्यन्तोऽभिमुखाः[14] स्फुरङ्कजमदाध्माताः पुरो निर्गताः।
प्रक्षिप्ताशुगजालपक्षपवनाधूते प्रतापानले[16]
चित्रं दाशरथेः क्षणाच्छलभतां यान्ति स्म सर्वेऽपि ते
॥५९॥

---

[1] देव B देवराज cett.
[2] °वीर्ययो° B °वीरयो° cett.
[3] Added along margin. क्ष्वेडा तु सिंहनादः स्यादित्यमरः Sc.
[4] ककुदः E ककुल K ककुभः cett
[5] पृषद्भ° E पृषत्क° cett
[6] भृशं for चिरं B only.
[7] °ञ्चानि B, E, W °ञ्चाणि K, Sc, $I_2$
[8] °मानमेव K °मानमेकमेव cett.
[9] °कृष्टतरं E °कृष्टान्तरं cett.
[10] अस्मद् E अस्मद् corr to अस्माद् W अस्माद् cett.
[11] °वृत्तान्ताद् B, E °वृत्ताद् cett
[12] वीक्ष्य for वीक्षे E only
[13] °जाकेतवो Sc, B °जाकैतवो W °जाः केतवो E, K, $I_2$
[14] °न्तोऽभि° E °न्तोऽभि° cett
[15] °शुग° E, K, Sc, $I_2$, B °शुग° W.
[16] प्रतापानले K, W, Sc, $I_2$ प्रतापामले B प्रतापाने E.

सविमर्शम्। एवं किलेयं पाञ्चभौतिको सृष्टिः।

त्रैलोक्यमप्यपर्याप्तं रक्षसां स्थातुमप्यदः।
येषां ते केवलं भूमौ विलिल्युः[1] पञ्चतां गताः॥६०॥

वास°। गन्धर्वराज पश्य[2] विस्मयनीयविप्रलम्भौ किलामू रा-
5 वणरावणौ[3]। यतः।

एताभ्यां राघवाभ्यां सकुतुकमिषुभिश्छिद्यमानेषु मूर्ध-
स्वेकस्यैकोऽप्यनन्तः किमु सदृशगुणो[4] वर्णनीयः परस्य।
एतत्सम्पश्यतोरप्यतिचिरमनयोः[5] कोऽप्यचिन्त्यः[6] प्रभावो
[7]यन्नोत्साहो न धैर्यं विरमति[8] न शिरश्छेदतः[9] पक्षिणोऽपि
10 ॥६१॥

नेपथ्ये। भो[10] भो[11] रामभद्र किमद्याप्युपेक्षसे [12]दुर्वृत्तमेनं कथं [13]चैकक्रियासाध्यमेतावन्तमर्थम्[14][15]। [16]अवधत्स्व तावत्।

भवान् सीतां लोकस्त्रिभुवनगतः प्रीतिमुचितां
कनीयान् पौलस्त्यः पुरममरतां स्वां पुनरयम्।
15 किमचान्यत् साक्षात्कृतपरमतत्त्वो मुनिगणः
प्रसादप्रोन्मीलन्मुदि मनसि शान्तिं च लभताम्॥६२[17]॥

---

[1] लिल्युः पञ्चत्वतां K विलिल्युः पञ्चतां [cett

[2] पश्य२ E पश्य cett.

[3] रावणरावणौ B, E, K रामरावणौ W, Sc रावण $I_2$

[4] सदृशगुणो वर्णनीयः B, K सदृशगुणीर्वर्णनीयः E सरसगुणौ वर्णनीयौ W, Sc सदसगुणौ वर्णनीयः $I_2$

[5] इत्थं सम्प° B एतत्सम्प° cett

[6] °न्त्यः प्र° B, K, Sc, $I_2$ °न्त्यं प्र° E

[7] यन्नो° K यत्नो° cett. [°न्त्यप्र° W

[8] वितरति E विरमति cett

[9] °श्छेदतः K, Sc, $I_2$, B °श्छेदने E °श्छेदनः corr to °श्छेदतः W.

[10] भो भो . . . कनीयान् (l. 14 below) om K only.

[11] भो B, E भोः W, Sc, $I_2$.

[12] दुर्वृत्त° . . . तावत् (next l) *here* om B

[13] चैकक्रिया° E वैकक्रिया° Sc, $I_2$ वै क्रिया° W.

[14] °मथ for °मर्थं E only.

[15] This stop in $I_2$ only

[16] प्रवधत्स्व E अवधत्स्व cett.

[17] Here added नेपथ्याभिमुखमवलोक्य। दुर्वृत्तमेनं कथं चैकक्रियासाध्यमेतावन्तमर्थ-मवधत्स्व तावत् in B

चित्र° । निशम्य । कथमेष दिव्यर्षिगणोऽप्येतयोर्वधाय राघवौ त्वरयति । अथवा दुर्वृत्तप्रशान्तिः[1] कस्य न मनःप्रसत्त्यै[2] । ससम्भ्रमाद्भुतौत्सुक्यम् । देवराज पश्य[3] ।

आभ्यां ब्रह्माच्युतास्मस्मरणसुरभिभिर्मार्गणै[4] राघवाभ्यां
मूर्धानश्चिच्छिदाने[5] रजनिचरपते रावणे[6]श्चाक्रमेण ।
पश्चाद्रक्षःकबन्धो[7] मृधभुवि विवशः सोऽपि रक्षो[8]वरोधः
क्षोण्यां श्रीदाशरथ्योः शिरसि च वियतः पुष्पवर्षः[9]
पपात ॥ ६३ ॥

वास° । नेपथ्याभिमुखमवलोक्य[10] । सोल्लासम् । गन्धर्वराज पश्य तावत् । एते किल चिभुवनश्चोर्दशकन्धरस्य निधनवृत्तान्तश्रवणेन प्रमोदनिर्भराः [11]सहमहर्षयः सुमनसः [12]कमपि [13]महोत्सवमनुबुभूषन्तो[14] मामेव प्रतीक्षन्ते[15] । तद् गच्छाम्येतेषां मनोरथसम्पादनाय । त्वमप्येतद्वृत्तान्तनिवेदनेन प्रियसखमलकेश्वरं प्रीणय[16] ॥

इति परिक्रम्य निष्क्रान्ताः सर्वे ॥

॥ षष्ठोऽङ्कः ॥

---

[1] °शान्तिः K °प्रशान्तिः cett.
[2] °प्रसत्त्यै B, K °प्रीत्यै E, W, Sc [प्रसै $I_2$
[3] पश्य२ B पश्य cett.
[4] °स्मरणं E °स्मरण° cett
[5] रजनी° E रजनि° cett
[6] °श्चाक्रमेण B °श्च क्रमेण cett.
[7] °कबन्धो B, E, K कबन्धौ W, Sc, $I_2$
[8] रक्षो विरोधः E रक्षोऽवरोधः cett
[9] °वर्षैः B °वर्षः K, $I_2$ °वर्ष Sc वर्तं W °वृष्टिः E.
[10] नेपथ्याभिमुखमवलोक्य om B only
[11] समर्हर्षयः E सहमहर्षयः cett
[12] कमपि E, K, B कपि corr to कमपि W कपि° Sc, $I_2$
[13] सुमहो° E महो° cett
[14] °मनुभूवतो E °मनुबुभूषन्तो cett
[15] प्रतीच्यन्ते E प्रतीक्षन्ते cett
[16] प्रीणय E, K, W, Sc प्रीणीय B प्राणय $I_2$

[1]ततः प्रविशति शोकाकुला लङ्का ॥

लङ्का। साक्रोशम्। हा महाराअ[2] [3]दसकन्धर [4][5]तेल्लोक्कवीरलच्छी-
[6]पडिग्गहणदुल्ललिद। हा स[7]अलरक्खसलोअपडिवा[8]लणसमत्थदु-
[9][10]म्मदभु[11]अदण्ड। हा पसुवइपा[12]दजु[13]अलच्च[14]णोव[14a]जु[15]ज्जन्तमु[16][17]द्धमुह[18]पुण्डरीअ[19]।
हा[20] [21]केकसीपुत्तति[22]लअ। हा वन्धु[23]अण[24]वच्छल। कहिं[25] मए[26] तुमं
[27]पेक्खिदव्वो। हा कुमार कुम्भ[28]अण। हा वच्छ[29] मेहणा[30]द। कहिं

---

[1] श्रीशं वन्दे begins, E only.

[2] °राय B °राअ cett

[3] दस° E, K दश° cett.

[4] हा add B only

[5] तल्लोक° B तेल्लोक° E, K, $I_2$ तेल्लोक्क° Sc तेलोक्क° W.

[6] °पडिगाहण° B °पडिग्गहण° E, K °पडिग्गाह° $I_2$ °पडिग्गह° Sc °परिगाह° W.

[7] सअयल° B सअल° cett

[8] °वालच्चण° B °वालण° cett.

[9] °संमत्थ° B °समत्थ° cett.

[10] °दुस्सद° B °दुम्मद° cett.

[11] भुय B °भुअ° cett

[12] °पाअ° E °पाद° cett.

[13] °जुयल° B °जुअल° cett.

[14] °अच्चणो° E °च्चणो° cett.

[14a] °पजु° all MSS

[15] °युजन्त° B °जुत्त° E °जुज्जन्त° cett.

[16] द्ध add. between °जुज्जन्त° and °मुद्ध° B only

[17] मुद्ध . . . पुत्त° (l 5 below) om. K

[18] °पुं° for °मुह° B only

[19] °रीय° B °रीअ° cett

[20] ह B हा cett.

[21] कीकसी° corr to केकसी° B केकसी° E केकसी° W, Sc, $I_2$

[22] °तिलय B °त्तीलेअ W °तिलअ cett.

[23] °अण° K °जण° E °यण° B °अरग° W, Sc °असा° $I_2$

[24] °वत्सल E °वच्छल cett.

[25] कहं $I_2$ कहिं cett

[26] मए K, $I_2$ मये E स एव B से W, Sc

[27] पेच्छिद° K पेक्खिद° cett.

[28] °अस K, Sc °अण E, W, $I_2$

[29] वत्स E वच्छ cett.

[30] °णाद B °णाह E °णाअ cett

सि । देहि मे पडिवअणम्[1] । परितो[2] विलोक्य । कहं को वि ण[3] [4]मन्तेदि । ऊर्ध्वमवलोक्य । हा दुट्ठदेव्व[5]दुव्विलसिअ कीस एवं[7] परिणदं सि । अहवा को एत्थ [8]भवदो उवालम्भो । अत्तणो एव्व[9] दुच्चरिदं एदं[11] विपरिणमेदि[12] ॥ इति सानुक्रोशं रोदिति ॥

ततः प्रविशत्यलका ॥

अलका । अहो कथमस्य रक्षःपतेरपूर्वः कोऽप्ययं दशापरिपाकः[13] । यदेतावानपि रक्षःसर्गः[14] क्षणेनैव विभीषणमात्रशेषः संवृत्तः । शब्दश्रवणं नाटयित्वा । परिक्रम्य । कथं कनीयसी मे भगिनी प्रत्यग्रभर्तृविरहव्यथाविधुरा क्रन्दन्ती लङ्का । उपसृत्य । भगिनि समाश्वसिहि[15] समाश्वसिहि ॥

लङ्का । विमृश्य । कहं वहिणिआ मे[16] अलआ[17] ॥

अल० । [18]भगिनि समाश्वसिहि समाश्वसिहि । एवं किलेयं लोकयात्रा ॥

---

[1] °वयणं B °वअणं cett

[2] °तोऽवलोक्य E °तो विलोक्य cett.

[3] ण W ष्टा E ण cett.

[4] मन्तेदि K, W, Sc, $I_2$ मन्तदि E मन्तेहि B.

[5] °देव° B °देव्व° K, W, Sc, $I_2$ °देव्व° om. E

[6] °दुव्विलस कीय B दुव्वलसिअ कीस K, W, Sc, $I_2$ °विलास कीस E.

[7] एवं B, K, Sc, $I_2$ एवं E एव्व corr to एवं W.

[8] भवदो om E only

[9] अत्त E एव्व cett.

[10] दुच्चिदं E दुच्चरिदं cett.

[11] एदं om. E only.

[12] °णमदि E °णमेदि cett.

[13] °परी° K °परि° cett

[14] रक्षसःसर्गः B रक्षःसर्गः cett

[15] समाश्वसिहि K once only.

[16] मह B मे cett.

[17] अलआ B, E अलआ cett

[18] भगिनि समाश्वसिहि समाश्वसिहि om. E.

[19] समाश्वसिहि समाश्वसिहि B समाश्वसिमि समाश्वसिमि W समास्वासि समास्वासि $I_2$ समास्वमि समास्वमि Sc समाश्वसिहि K.

लङ्का। अयि[1] वहिणिए[2] कुदो मे आसासो। जुवइजणमेत्तसेसा[3] संवुत्त म्हि[4]। एक्को[4a] उण कुलतन्तू[5] कुमारविहीसणो[6] चिट्ठदि त्ति सुणीअदि[7][8]। सो वि मह मन्दभाइणीए अधण्णदाए[9] रिउवक्खं[10] जेव्व सेवेदि॥

अल०। अयि[11] भगिनि[12] मा मैवम्। न खल्वस्माकं स[13] रिपुपक्षः॥

लङ्का। कहं विअ[14]॥

अल०। यस्य रिपुः स गतस्तच्च गतम्। सम्प्रति तु निसर्गसुहृदस्माकं विभुवनावनप्रसिद्धसम्बन्धो दाशरथिः[15]॥

लङ्का। आश्वस्ता। कहं ईरिसो[16] वि॥

अल०। ईदृश एव॥

लङ्का। कहं अम्ह [17]सामिसु ईरिसो विपरिणदो॥

---

[1] अपि Sc अयि cett.

[2] °णीए E °णिए cett.

[3] युवइ° B जुवइ° cett

[4] °मेत्तसेसा B °मेत्तसेसा K, W, Sc °मेत्तसेसी $I_2$ °मेतसेसा E

[4a] एको all MSS

[5] °तन्तु E °तन्तू cett.

[6] °विभीसणो B °विहीसणो E, K, Sc, $I_2$ °विहिसणो W

[7] क्खु add W, Sc only.

[8] सुणीयदि B सुणीअदि cett.

[9] अधण्ण° B, K अधण° cett

[10] रिउपक्खं B रिउपक्खं W, Sc, $I_2$ रिउवक्खं K रिउपखे E

[11] अपि Sc अयि cett.

[12] भागिणी E भगिनि K भागिनि cett.

[13] स रिपुपक्षः . . . °दस्माकं (l. 9 below) om E only

[14] अअ W विअ cett

[15] °भुवनावनप्रसिद्धसम्बन्धो K °भुवनीवनप्रसिद्धं सन्धो B °भुवनप्रसिद्धसम्बन्धो E, W, Sc, $I_2$

[16] ईरिसो E, Sc, B इरिसो W हीरिसो $I_2$ हीरिसो K.

[17] सारिसु B सामिसु K, W, Sc, $I_2$ सामीसु E.

अल०। [1]अप्यननुसन्धाने किमेवं भाषसे। शृणु।

रघुकुलतिलकेऽस्मिन् भ्रातृमात्रद्वितीये
किमपि पितृनिदेशाद्दण्डकां[2] सम्प्रविष्टे।
यदुचितममुना ते राक्षसानां विनेचा
विहितमयमशेषः कर्मणस्तस्य पाकः ॥१॥

लङ्का। हुं तुमं उण[3] ईरिसे[4] पत्थावे[5] कहं एत्थ उवट्ठिदा सि[6][7] ॥

अल०। अवधत्स्व। अहं किल वैमातृकेण[8] पौलस्त्येन गन्धर्वराजाच्चित्ररथादमुं वृत्तान्तमुपलभ्य शिष्टबन्धुप्रतिबोधनाय विभीषणस्य च लङ्काभिषेकसाक्षात्करणाय रावणापहृतविमानराजस्य पुष्पकस्य[9] च रामभद्रोपस्थानोपदेशदानाय[10] सन्दिष्टा[11] ॥

लङ्का। अम्मो[12] कहं भअवदो पसुवइणो वि मित्तं णिधाणाधिवई[13] सक्खं[14] एवं[15] उवचरदि[16] रामभद्दम्[17] ॥

---

[1] अननु° for अप्यननु° E only

[2] °कान् B °का E, K, W, Sc °को $I_2$

[3] तुण E उण cett

[4] ईरिसे E, W, Sc इरिसे B ईरिसे $I_2$ एरिसे K.

[5] पत्थावे B, K, Sc पथावे E पत्थावे W, $I_2$

[6] उवट्टदा W उवटिदा E उवट्ठिदा B, K, Sc, $I_2$.

[7] सी Sc सि cett.

[8] °मातृकेण B, E, K °मात्रकेण W, Sc, $I_2$

[9] °राजाच्चि° W, Sc, B °राजाचि° K, $I_2$ °राजचि° E

[10] °भद्रप्रस्था° for °भद्रोपस्था° E only.

[11] [illegible] B सन्दिष्टा cett

[12] अमा E अम्मो cett

[13] णिधाणाधिवई B णिधाणाहिवई W, Sc, $I_2$ णिधाणाहवई E णिधाणाविवही K

[14] सयं B सक्खं E, K शाक्षं $I_2$ साक्षं W सोक्षं Sc

[15] एवं E एव्वं cett.

[16] °चरादे E °चरति W, Sc °चरदि B, K, $I_2$.

[17] °भद्दं B °भदं E °भद्रं K, W, Sc, $I_2$

अल०। अयि[1] किमत्राश्चर्यम्।

इदं हि तत्त्वं परमार्थभाजा-[2]
मयं हि साक्षात्पुरुषः पुराणः।
त्रिधा विभिन्ना प्रकृतिः किलैषा
त्रातुं भुवि स्वेन सतोऽवतीर्णा ॥२॥

बङ्का। कहं अम्ह[3] सामिणा रक्खसणाहेण[4] एदं ण [5]ओधारिदम्॥

अल०। अयि सरले। शापमहिम्ना किल मूर्छन्मोहः सोऽपि नापराध्यति॥

नेपथ्ये कलकलः। उभे ससम्भ्रममाकर्णयतः॥

पुनर्नेपथ्ये। समवधत्त[6] भोस्त्रिजगच्चराणि भूतानि।

वस्वर्करुद्रसहितः स्वयमेष साक्षाद्
वृद्धश्रवाः समभिनन्दति साधु साध्वीम्।
अग्निप्रवेशपरिनिर्गमशुद्धभावां
सीतां रघूत्तम भवस्थितिमादियस्व[7] ॥३॥

अल०। कथमेते दिवौकसोऽपि दशकन्धरगृहनिवासव्यसनकौली-[8]नशङ्कापनुत्यै कृतपावकप्रवेशनिर्गमनां सीतां[9] देवीमभिनन्दन्ति। अहह।

पतिव्रतामयं ज्योतिर्ज्योतिषान्येन शोध्यते।
इदमाश्चर्यमथवा लोकस्थित्यनुवर्तनम् ॥४॥

---

[1] अपि E, $I_2$ अयि cett

[2] परमार्थ° K, W, Sc, B परमार्ध° E यामार्थ° $I_2$.

[3] अम्हाणं B अम्ह K, Sc, $I_2$ अह्म E, W.

[4] °नादेण W °णाहेण cett

[5] अधा° E ओधा° cett

[6] समधत्त B समवधत्त cett.

[7] भवस्थि° B, E, K भवत्स्थि° W, Sc, $I_2$

[8] °ग्रह° E °गृह° cett

[9] सीतां देवी° E, K सीतादेवी° cett.

शब्दश्रवणं नाटयित्वा। सङ्का। कहं मङ्गलतूरखेमिस्सा[1] ओ गीदीओ णिसमीअन्ति[2] ॥

सर्व०। नेपथ्याभिमुखमवलोक्य। कथं सीताविशुध्यनुमोदनार्थमवतीर्णाभिरप्सरोभिर्दिव्यर्षिगणैश्च रामभद्रनिदेशेन निष्पादिताभिषेककल्याणो विभीषणः पुष्पकं पुरस्कृत्य रामभद्रमभ्येति। तदेहि तथाविधसहजमहिममहनीय[3]चरित[3a]महानुभाव[4]मवलोकनेन चक्षुः कृतार्थयावः ॥

इति परिक्रम्य[5] निष्क्रान्ते ॥

॥ मिश्रविष्कम्भकः[6] ॥

ततः[7] प्रविशति पार्श्वगत[8]हनूमत्सुग्री[9]वः ससीतालक्ष्मणो रामः ॥

रामः। किं चिराय[10]ते विभीषणः ॥

ततः प्रविशति पुष्पक पुरस्कृत्य विभीषणः ॥

विभीषणः। अनुष्ठितः किल मया रामभद्रादेशः। तथा हि सत्कृतं मातलिमनु

अजस्रगलदस्रसम्भ्र[11]वकिणाङ्कगण्डस्थलाः
स्खलत्कनक[12]कङ्कणं नियमितैकवेणीभृतः।
क्षमातलविवर्तनातिमलिनाम्बरा मोचिताः
प्रयान्ति किल सस्मि[13]ताः स्म सुरलोक[14]वन्दिस्त्रियः ॥५॥

---

[1] °राव° B °रव° cett

[2] णिसमीअन्ति B णिसमिअन्ति E णिसामीअन्ति Sc णिसम्मीअन्ति K णिसामीअन्ती W णिसमीअन्ति $I_2$

[3] °महनीयचरित° om. K only

[3a] °चरित° W, Sc, $I_2$, B °चरिच° E

[4] °भावलोक° Sc °भावावलोक° cett

[5] परिक्रम्य E परिक्रम्य cett

[6] °विष्कम्भः E °विष्कम्भकः cett

[7] ततः प्रविशति . . . चिरायते विभीषणः om. W, Sc, $I_2$ only.

[8] °हनू° B, K °हनु° E

[9] °ग्रीवः E, K °ग्रीव° B

[10] चिरायते E, K चिरायितो B

[11] °संलव° E °सपद्यव° $I_2$ °सम्भव° cett.

[12] °कङ्कण° W °कङ्कणं cett

[13] सङ्गिताः B सम्मिताः E, K सम्मिता Sc, $I_2$ सम्मिता changed to संगिता W.

[14] °वन्दि° K, W, Sc, $I_2$ °वन्द्दी° B °वन्धी° E.

उपस्थित्य[1]। जयतु[2] जयतु रामभद्रः। देव[3] एतद्[4]वसानः किल निदेशः सम्पादितः।

[5]कार्तस्वराभिर्दृश्याभिः पतिताभिश्च[6] साम्प्रतम्।
वन्दीभिरिव ताः कारा[7]: शृङ्खलाभि[8]रलङ्कृताः[9] ॥६॥

अयं च पुष्पकनामा स[10] विमानराजः।
असंरुद्धगतेरिष्टप्रवृत्तेर्वशवर्तिनः।
मनोरथस्यानुगुणं सर्वदा यस्य चेष्टितम् ॥७॥

रामः। साधु लङ्केश्वर साधु सम्पादितम्। सुग्रीवं प्रति। सखे वैकर्तने किमत्रावशिष्यते ॥

सुग्रीवः।

उत्खातस्त्रिभुवनकण्टको ऽतिदृप्त-
दोर्दण्डा[11]ञ्चितमहिमाप्ययं निकारः।
देव्याश्च प्रतिशमितस्तथाच सन्धा
निर्व्यूढा[12] प्रगुणविभीषणाभिषेकात् ॥८॥

सम्प्रति तु द्रोणा[13]द्रिं प्रत्याहरतो [14]हनूमतः सविशेषं गृहीत-

---

[1] उपस्त्य Sc उपस्थ्य cett

[2] जयतु२ B जयति२ W जयति E, K, Sc, $I_2$.

[3] देवाः E देव cett

[4] एव तदवसानः W एतदवसानः cett.

[5] कार्तस्वराभि° W, Sc, B कार्तस्वरीभि° E कार्तस्वरोभि° $I_2$ कर्मान्नराति° K

[6] पतिताभिश्च B, K प्रतीत्वाभिश्च E पताभिश्च $I_2$ पताकाभिश्च W, Sc

[7] °रिव ताः कारा: B °रेवि ताः कारा K °रेधिताः कारः Sc °रेधिताकारः W °रेधितीः कारा: $I_2$ °रेधिताः करा: E.

[8] शृङ्खला° B शृङ्खला° cett.

[9] °ङ्कृता E °ङ्कृताः cett.

[10] स om. E only.

[11] °र्दण्डोचित° E °र्दण्डाञ्चित° cett.

[12] निर्व्यूढा B, $I_2$ निव्यूढा K निर्बूढा E निर्व्यूढ Sc निव्यूढ corr to निर्व्यूढः W

[13] °णाद्रिं [illegible]रो E °णाद्रिं प्रत्याहरतो cett.

[14] हनु° E हनू° cett.

प्रवृत्तिर्दुर्मनायते[1] किल कुमारभरतः। तं प्रति वार्ताहरः प्रवि-
सृज्यतां[2] प्राभञ्जनिः। स्वयमप्यलङ्क्रियतां विमानराजः॥

रामः। यदभिरुचितं प्रियवयस्याय॥ इति तथा कृत्वा सर्वे विमानारोहणं नाटयन्ति॥

सीता। अपवार्य। लक्ष्मणं प्रति। अम्हेहिं सम्पदं कहिं[3] पत्थीअदि॥

लक्ष्मणः। देवि रघुकुलराजधानीमयोध्यां प्रति॥

सीता। अवि समत्तो सो वणवासस्स[4] अवही॥

लक्ष्म°। देवि अद्यतनमेव दिनं तत्[5]॥ सर्वे विमानगतिं निरूपयन्ति[6]॥

सीता। साश्चर्यम्। अज्जउत्त एदे उण कदमा दूरादो[7] अणिद्धारिद-
णिण्णोणआ[8] वित्थरिज्जन्तसामलत्तणा[9] परिसरा दीसन्ति[10]॥

रामः। सस्मितम्[11]। देवि नैते भुवां परिसराः किन्तु

साक्षात् किलाष्टमूर्तेस्तस्यैषा मूर्तिरम्मयी प्रथमा।
गीतः सागर इति नृभिरपरिच्छेद्यात्मगाम्भीर्यः॥९॥

सीता। जो अम्हाणं जेट्ठसमुरेहिं किदणिम्माणो त्ति[12] वुड्ढपरम्प-

---

[1] °प्रकृतिः E °प्रवृत्तिः cett.

[2] °सृज्यतां E प्रविसृज्यसृज्यता W प्रविसृज्यतां cett

[3] पत्थीअदि B पत्थीअदि K, Sc, $I_2$ पथीअदि E अत्थिअदि W

[4] वणदासस E वणस्स W वणवासस्स cett.

[5] ततः for तत् B only.

[6] निरूप° W, E, B रूप° K, Sc, $I_2$.

[7] अणिद्धारिद° B, K अणिद्धारि W अणिद्धारिदद° Sc अणिधारिद° E अणिद्धाशिरद° $I_2$.

[8] °णिण्णोणआ K °णियोणया B °णिणोसा $I_2$ °णिणोणं E °दचिणोद्देशा W °दचिणोद्देसा Sc.

[9] वित्थरिज्जन्त° B विस्थारिज्जन्त° K अवित्थारिज्जन्त° Sc, $I_2$ अवित्थारिज्जन्त° W अविथरिजन्त° E.

[10] °सामलत्तणा B °सामलत्तण° K, W °सामलत्तन° $I_2$ °सामलतण° Sc °सामलतन° E

[11] णसंन्ति B दिसन्ति E दीसन्ति cett.

[12] सस्मितम् om W, Sc, $I_2$ only.

[13] ति E, W त्ति cett

[14] वुट्ठ° K, W वुट्ठ° $I_2$ वट्ठ° Sc वुढ° E.

राए [1]सुणीअदि। एदस्स[2] मञ्झे[3] वि किं एदं दूरप्पसारिदं[4] धवलं-
सुअं विअ[5] अहिणवतिणच्छणासु[6] भूमिसु दीसइ[7] ॥

लक्ष्म०। देवि।

सोत्साहं धृतशासनैः सकुतुकैर्वृक्षौकसां नायकै-
दिक्पर्यन्तधराधरेन्द्रशिखराण्यानाय्य निर्मापितः[8]।
कल्पान्तावधिवन्दनीयमहिमा[9] लोकस्य सेतुर्नवः
[10]कीर्तिस्तम्भ इवायमार्यचरितस्याम्भोनिधौ[11] लक्ष्यते
॥१०॥

रामः। अङ्गुल्या निर्दिशन्। वत्स

एता भुवः परिचिनोषि मिलत्तमाल-
च्छायान्धकारिततुषारनिकुञ्जपुञ्जाः[12]।
उन्मूर्छदच्छमलयाचलतुङ्गशृङ्ग-
प्राग्भारनिष्पतितनिर्झरपूरभाजः[13] ॥११॥

लक्ष्म०। आर्य ता[14] एवैताः। नातिदूर[15] एव तावदासां स [16]जी-
र्णकन्दरः।

---

[1] सुणीयदि B सुणीअदि K, Sc, $I_2$ सुणीअदी E सुदिअदि corr to सुदीअदि W

[2] एतस्स B एदस E एदस्स cett.

[3] मज्जे B मज्झ $I_2$ मन्झ W मज्ज Sc मझे K मन्न E

[4] दूर पसा० E दूरप्पसा० cett.

[5] व B वि E विअ cett

[6] °छणासु K, W °छणासु cett.

[7] दीसइ B, Sc दीसई K, E, W दीसइं $I_2$

[8] °पितः B, K, $I_2$ °यितः E, W, Sc

[9] °वन्दनीय° B, K °नन्दनीय° E °वन्धनीय° W, Sc, $I_2$.

[10] कीर्ति . . . एता भुवः (! 10 below) om K.

[11] °चरितस्यालक्ष्यतेऽम्भोनिधौ B °चरितस्याम्भोनिधौ लक्ष्यते E, $I_2$ °चरितस्वम्भोनिधौ लक्ष्यते Sc °रचित (corr by rev from °चरित°)स्वम्भोनिधौ लक्ष्यते W.

[12] °कुञ्जाः K °पुञ्जाः cett.

[13] °भारः W °भाजः cett

[14] ता देवैताः E ता एवैताः cett.

[15] नातिसुन्दर W नातिदूर cett.

[16] जीर्णः कलिः B जीर्णकन्दरः cett.

[1]गर्जाजर्जरितासु दिक्षु वधिरे तत्स्फूर्जथुस्फूर्जिते-
व्योम्नि भ्राम्यति दुष्प्रभञ्जनजवाद्भेऽप्यदभ्रे मुहुः ।
आक्षिप्यान्धयति द्रुमान्धतमसे[2] चक्षुः प्रविश्य क्षपा
[3]यत्रासीत् क्षपिता क्षरज्जलभरे त्वक्सारलक्ष्मीकृते ॥१२॥

5 सीता । स्वगतम् । अहो पमादो । कहं मह मन्दभाइणीए दुट्ठदेवेहिं[7] एदे वि[8] महाणुभावा ईरिसं अवत्थन्तरं अणुहोविदा ॥

विभी० । देव रामभद्र । दृश्यन्ते किलैताः कावेरीतीरभूमयः ।
यत्पर्यन्तमहीध्रसीम्नि कुहलीमाध्वीकधाराझरी-
हृद्यत्पूगवनीघनीकृततलैस्तुङ्गैर्जरच्छाखिभिः ।
10 लक्ष्यन्ते विविधाश्रमाः स्थिरतपःस्वाध्यायसाक्षात्कृत-
ब्रह्माणो निवसन्ति यत्र मुनयः कल्पस्थितेः साक्षिणः ॥१३॥

यतो नातिदूर एव किलावाच्यां लोपामुद्रापरिष्कृतपरिसरे दीप्यति कौम्भसम्भवं ज्योतिः ॥

---

[1] गर्जाजर्जरितासु° K, W, $I_2$ गर्जागर्जरिता° Sc गर्जज्जर्जरिता° E

[2] °तमसे changed to °तमसि W

[3] पिचा° for यत्रा° E only

[4] °भरे B, K, $I_2$ °धरे E, Sc °धरे changed to °धर W.

[5] त्वक्साच्य° B, $I_2$ त्वत्साच्य° E त्वक्सार° K, W, Sc.

[6] °लक्ष्मी° B °लक्ष्मी° cett.

[7] °देवेहिं B, K, $I_2$ °देवेहिं E, Sc °देवेहिं W.

[8] व B वी E वि cett

[9] °भावा K, Sc °भावि B °हावा E, W °स्रावा $I_2$

[10] अवर्धतरं for अवत्यन्तरं E only

[11] अणुहाविदो B अणाहाविदा $I_2$ अणुहाविदा K, E, W, Sc.

[12] कुहली° B, E, K, $I_2$ कुहलो Sc कुहलो in text underlined and सुमनो along margin, W

[13] °धाराझरी° B, K °धारोज्झारी E °धारोज्झिरी $I_2$ °धारोज्झिरद् W, Sc.

[14] °त्प्लवगवली° for °त्पूगवनी° E only

[15] °जलै° W °तलै° cett

[16] किल om W only

[17] °वाच्यं for °वाच्या E only.

[18] °सरं B, E, K °सरे W, Sc °सर $I_2$

रामः। कथमतिक्रान्तमागस्त्याश्रमपदम्[1][2]।

अयं वारां राशिः किल मरुरभूद् यद्विलसितै-
रयं विन्ध्यो[3] वन्ध्योद्धतविहृतिराध्मानमजहात्[4]।
[5]विलिल्ये यत्कुक्षिस्थितशिखिनि वातापिरवपुषा
स कासां वाणीनां मुनिरकलितात्मास्तु विषयः॥ १४॥

तदप्रमेयविभवा विश्वान्तरात्मसाक्षिणस्ते[6][7] महात्मानः कुतश्च नाभ्यभिवन्द्याः[8]॥ सर्वे तथा कुर्वन्ति॥

आकाशे। सानुजस्त्वं[9] प्रजां शाधि
कल्पान्तस्थायि ते यशः।
नामापि राम गृणता-
ममृतत्वाय कल्प्यताम्[10]॥ १५॥

रामः। आकर्ण्य। कथमशरीरिण्या गिरा परमनुगृहीतो[11] महामुनिवन्दारुः॥ इतरेऽभिनन्दन्ति[12]॥

विभी०। देव[13] रामभद्र। एतास्ताः पम्पापर्यन्तभूमयः[14] यासु बहोः कालादनुभूयमानान्यपभिज्ञानानि[15] बलाच्चक्षुराकर्षन्ति[16]। तथा हि।

---

[1] °स्त्याश्रम° E, W, B °स्त्यमाश्रम° K, Sc, $I_2$ 'Agastyasrama' along margin by rev., W

[2] सस्मरणं add. B only.

[3] वन्ध्योद्धत° B, K वध्योहत° E वन्ध्योहत° $I_2$ येनाहत° W, Sc.

[4] °ध्यान° E, $I_2$ °ध्मान° cett.

[5] बलित्थे for विलिल्ये E only.

[6] विश्वम्भरा° B विश्वन्तरा° $I_2$ विश्वान्तरा° K, E, W, Sc

[7] ते om W only.

[8] नाभि° W, Sc नाभ्यभि° cett.

[9] °जस्तं E °जस्त्वं cett

[10] कल्प्यतां E कल्पतां cett.

[11] °तोऽहमाशीर्भिः B only.

[12] इतरोऽभिनन्दति B इतरे अभिनन्दति $I_2$ इतरे अभिनन्देति E इतरे अभिनन्दन्ति K, W, Sc

[13] देव om E only.

[14] Adds 'Pampa' along margin by rev, W

[15] °न्यभि° E, W °न्यभ्यभि° cett.

[16] °कर्षयन्ति E °कर्षन्ति cett.

बाणेनैकेन विद्धं विलसति पुरतस्लज्जरत्नालखण्डं
सोऽपि क्रीडाकपित्वं क्षणमिषुनिवहैरन्वभूदत्र वाँली।
सौमित्रिः पादघातादिह हि सकुतुकं प्राक्षिपत् कूटमस्थ्नां
काबन्धं दृष्टमस्मिन् हनुमति भवतैवोत्तरीयं च देव्याः
॥१६॥

सीता। स्वगतम्। किं णाम मह उत्तरीअं अज्जउत्तेण हणुमन्तस्स हत्थे दिट्ठम्॥

रामः। सस्मरणम्। हे देवि। तदा किल वैक्लव्यात्पह्रियमाणाया भवत्याः प्रभ्रष्टमनसूयानामाङ्कमुत्तरीयमस्माभिः प्रथममभिज्ञानमासादितम्।

दृशोः शरच्छीतकरप्रकाशः
कायेऽपि कर्पूरपरागपूरः।
स्वान्तेऽपि सान्द्रामृतकुम्भसेक-
स्तदा यदासीत् किल दृष्टमात्रम् ॥१७॥

सीता शृङ्गारलज्जां नाटयति॥

---

[1] पुरस्त° E पुरतस्त° cett

[2] पाली W वाली cett

[3] °घातैरिह B °घातादिह cett

[4] कूप° in original and 'ट।?।' along margin, W.

[5] कावंचद्दामं म° E कावंचंदढम° $I_2$ काबन्धं दृष्टम° cett.

[6] मह K, Sc, B सह $I_2$ सह corr. to मह W.

[7] °रीयं B °रीअं cett.

[8] हणु° E हनू° W हणू° Sc, $I_2$ हनु° K.

[9] हे om. B only.

[10] किल om K only.

[11] °नामाङ्कितमु° K °नामाङ्कमु° cett.

[12] प्रथममभिज्ञात° B प्रथममभिज्ञान° K, E, Sc प्रथमभिज्ञान° W प्रथमभे ज्ञान° $I_2$.

[13] कायें $I_2$ काये cett.

[14] खलु B किल cett.

लक्ष्म। [1]आर्ये।

तातस्य मित्रं किल गृध्रराज-
स्तं पापमस्मिन् सहसानुबध्नन्।
गात्रं जराजर्जरितं विहाय
यशःशरीरं नवमालालम्बे ॥१८॥

सीता। स्वगतम्। कहं [2]मह कारणादो तारिसाणं पि[2a] महाणु[3]भावाणं ईरिसो अवत्थाविसेसो[4] णिसमीअदि[5] ॥

सुग्रीवः। देव अतिक्रम्यन्ते किलैता[6] दण्डकासीमानः[7]।
यत्र तेऽपि स्वसुः कर्णनासौष्ठविचिचीषया।
सानुप्लवाः क्वापि यातास्त्रिमूर्धखरदूषणाः ॥१९॥

सीता। वेपमाना[8]। अम्मो कहं पुणो वि[9] ते[10] जेव्व[11] रक्खसा सुणीअन्ति ॥

रामः। देवि अलं शङ्कया। अभिधानमात्रमवशिष्यते।
शरासनस्य टङ्कारात् सौमित्रेः केवलं किल।
रक्षसां प्रलयः सिंहगर्जनाद्दन्तिनां[12] यथा ॥२०॥[13]

---

[1] आर्य B, E, K अयं W, Sc आया $I_2$

[2] मम B महं E मह cett

[2a] वि all MSS

[3] °णुभावाणं B, Sc, $I_2$ °णुहावाणं E °नुभावाणं K, W.

[4] °विशेसि $I_2$ °विसेसो cett.

[5] णिसमीअदि B, $I_2$ [illegible] K णिसम्मीअदी E णिसामीअदि W, Sc.

[6] °लेते B °लेता cett.

[7] दण्डकसीमाः E दण्डकासीमानः cett 'Dandaka' added along margin by rev., W.

[8] कम्पमाना for वेपमाना K only.

[9] वि om. B only.

[10] ते om. W, Sc, $I_2$

[11] जेव्व E, K ज्जेव्व Sc, $I_2$ व्व B ज्जेव्व W

[12] °द्दन्तिनां K, W, Sc °द्दन्तिनो E °र्द्दन्तिनां B °दन्तिनां $I_2$.

[13] सीतोर्ध्वमवलोकते add. B only.

निरूप्य। किमन्यादृशीव[1] गतिरस्य विमानराजस्य ॥

विभी°। देव अत्युच्चैः[2] किलायं सह्यः[3] सानुमान्। [4]एनमतिक्रम्य गम्यते[5] किलार्यावर्तः[6]। तदतिक्रमणायेदमपि मध्यमलोकसान्निध्यं किञ्चिदुज्झति[7] ॥

लक्ष्म°। द्रष्टव्यः[8] किलोत्तमपुरुषमध्यम[9]पदलाञ्छितो [10]लोकः ॥

सर्वे [11]उच्चैर्गतिवेगं [12]निरूपयन्ति ॥

रामः। निरूप्य। सविस्मयम्।

[13]यः पूर्वेषां नः कुलस्य प्रतिष्ठा
देवः[14] साक्षादेष धाम्नां निधानम्।
चय्याः सारः कोऽपि मूर्तो विवस्वान्
प्रत्यासन्नः पुष्पकारोहणेन[15] ॥२१॥

सर्वे कपोतकेन[16] प्रणमन्ति ॥

सीता। उच्चैर्निरूप्य। [17]अम्मो कहं दिणम्मि वि तारआचक्कं[18] विअ एदं दीसदि ॥

---

[1] °दृशी च E °दृशीव cett

[2] उच्चैः B अत्युच्चैः cett

[3] 'Sahya mountain' added along margin by rev., W.

[4] तद् add. B only

[5] गंखते B गखते $I_2$ गम्यते cett

[6] Orig. किलायं वित्तेति, but वित्तेति is meant to be omitted, B किलार्यावर्तः cett. 'Aryavartta' added along margin by rev., W.

[7] °दुह्यति for °दुज्झति E.

[8] द्रष्टव्यात्तम° changed to द्रष्टव्य एवोत्तम° B द्रष्टव्यः किलोत्तम° cett.

[9] मध्यम om. here, W, Sc only

[10] मध्यम add here, W, Sc only.

[11] अत्युच्चै° K उच्चै° cett

[12] रूप° K निरूप° cett

[13] यः पूर्वैषामन्वयस्य B यः पूर्वेषां नः कुलस्य K, E, Sc, $I_2$ Text as in K, but सत् added along margin, prob. meant as a v.l for नः W.

[14] देव B, E देवः K, W, Sc, $I_2$.

[15] °रोह° B, E, K, Sc °रोप° W, $I_2$

[16] कपो° B, E, K, $I_2$ कापो° W, Sc

[17] विस्मयं add. E only.

[18] °चक्कं B °चक्कं cett

रामः। देवि तारकाचक्रमेवैतत्[1]। अतिविप्रकर्षाद्रविकिरणप्रतिहतचक्षुर्भिर्न दृश्यते किल दिवसे स विमानारोहणादपास्तः[2]॥

सीता। सकुतुकम्। कहं गअणवाडिआए[3] [4]फुल्लाइं [5]कुसुमाइं व[6] [7]दीसन्ति[8]॥

रामः। समन्ततोऽवलोक्य। कथमपरिच्छेद्यदिग्विभागमिव सम्प्रति जगत्। यतः।

संस्तूयन्ते विप्रकर्षाज्जीमा नोपधयः[9] स्फुटम्।
आन्तरिक्षाः पुनरमी सर्वतः सदृशा इव॥२२॥

सुधी°। देव भ्रातुः सौहार्देन विधेयीकृतो यदृच्छया दिग्नेषु विचरन्नभ्युपपन्नवानस्मि। तथा हि।

उदयास्ताचलावेतौ [10]यत्क्रोडे बाल्यवार्धके।
विस्मयाच्चन्द्रसूर्याभ्यामतीयेते विनिर्भयम्॥२३॥

अवधत्तामितो देवः।

[11]कैलासाञ्जनशैलावेतौ तुल्योन्नतत्वपरिणाहौ।
चन्दनमृगमदलेपं गमितौ क्षोणया नु[12] वक्षोजौ॥२४॥

इतश्चायं काञ्चनाचलः। परतश्चायमभ्रङ्कषशिखरः[13] शिखरी[14] गन्धमादनः। ततः परं[15] अगम्या मादृशां भूमयः॥

---

[1] °मेवै तत् K, W, Sc, $I_2$ °मेतत् B, E.

[2] °रोहणादपास्तः B, E, K °रोहणादपास्त $I_2$ °रोहणदयास्त Sc °रोहणदयास्त changed by rev. to °रोहणे दीयास्त W.

[3] गयण° B गअण° cett.

[4] फुल्लाई B, Sc फुल्लाईं E फुल्लाइं K फुल्लाइं W फुल्लाहं $I_2$

[5] कुसुमाईं B कुसुमाइं W, Sc, $I_2$ कुसुमाईं K कुसुमा E.

[6] व B, K, $I_2$ व E, W, Sc.

[7] परितो add. B only.

[8] दीसन्ति B दिसन्दि E दीसन्दि cett

[9] नोपधायः W only.

[10] यत्क्रोड़े . . . °शैलावेतौ (l 14 below) om. E only.

[11] कैलासा° W, K, B कैलाशा° Sc, $I_2$.

[12] नु B, K, E न W, Sc न् $I_2$

[13] °शिखरः B, K °शिरः cett.

[14] शिखरो E शिखरी cett

[15] परञ्चादग° W, Sc परमग° cett.

रामः । [1]परितो [2]विलोक्य । ससम्भ्रमाद्भुतम् । कथमेकपद् एव सर्वमहो चक्षुर्गोचरं[3] । [4]अपरिच्छेद्या च सर्गस्थितिः ॥

सीता । [5]अम्मो एदं किं पि[5a] [6]अदिट्ठपुरुवं [7]अणारिसं जेव्व[8] दीसइ[9] ण माणुसो णावि पसू ॥

रामः । देवि अश्वमुखं किन्नरमिथुनमेतत् । प्रायेणैतासु भूमिष्वेवंविधानामेव भूयसां प्रचारः ॥

विभी° । कथं सम्मुखमेवाभ्येति[11] । प्रायेणालकेश्वरनिदेशधारिणानेन[12] भवितव्यम् ॥

नेपथ्ये । देव दिनकरकुलमणे रामभद्र । भवन्तमेकपिङ्गलेश्वरनिदेशादुपश्लोकयितुं साकेतं प्रस्थितयोर्नौ[13] सुकृतपरिणामादन्तराल एव चक्षुर्विषयोऽसि । तन्निदेशपारतन्त्र्यमपि भूयसे गुणाय [14]यत् पुराणस्यैव[15] पुंसो व्यक्तिपर्यायनिष्ठं महः साक्षात्क्रियते ॥ इति प्रदक्षिणीकृत्याभिवन्देते[16] ॥

सर्वे निरूपयन्ति ॥

---

[1] परितो विलोक्य । ससम्भ्रमाद्भुतम् om. *here*, B only.

[2] विलो° K, W, Sc, $I_2$ वलो° E

[3] °चरम् E, K °चरः W, Sc, $I_2$.

[4] अपरि° B, E, K परि° W, Sc, $I_2$

[5] परितो विलोक्य । ससम्भ्रमाद्भुतम् added *here* by B. In this passage, which it wrongly repeats further on, B reads only ससम्भ्रमम्.

[5a] वि all MSS.

[6] °अदिट्ठपुरुवं K अदिट्ठपुरुवं $I_2$ अदिट्ठपुवं E, W, Sc दिव्वं पुरुषं B.

[7] अणा° E, W, Sc, B अणा° K, $I_2$.

[8] जेव्व W, Sc, E, $I_2$, B जेव K.

[9] दीसइ W, Sc, $I_2$, K, B दिसइ E.

[10] °मिथुन° W, Sc, $I_2$, K, B °युगल° E.

[11] सम्मुख° B, E, K, Sc, $I_2$ समुमुख° W.

[12] °रनिदेश° B, E, K, $I_2$ °रादेश° W, Sc.

[13] °योर्नौ B, E, K, $I_2$ °योरावयोर्या W °योरावयोर्याचा° Sc.

[14] यत् B, E, K, Sc, $I_2$ तत् W.

[15] °स्यैव पुंसो व्यक्ति° E, K °स्यैकशो व्यक्ति° B °स्यैव पुंसोऽभिव्यक्ति° W, Sc, $I_2$.

[16] °कृत्य वदन्ते E °कृत्याभिवन्देते cett.

पुनर्नेपथ्ये किन्नरः।

आपन्नवत्सल जगज्जनतैकबन्धो[1]
विद्वन्मरालकमलाकर रामचन्द्र।
जन्मादिधर्मविधुरैः[2] सुमनश्चकोरैः[3]-
राचम्यतां तव यशः शरदां सहस्रम् ॥२५॥

तत्रैव[4] किन्नरी।

यावत् फणीन्द्रशिरसि क्षितिचक्रमेतद्
यावत् पुनर्ग्रहगणैः[5] शबलं विहायः[6]।
वैदेहि तावदमलो भुवनेषु पुण्यः
श्लोकः[7] प्रशस्तचरितैरुपगीयतां ते ॥२६॥

दम्पती मन्दाक्षं नाटयतः॥

इतरे। प्रियं[8] प्रियं नः॥

रामः। लङ्केश्वर चिरसञ्चरणादत्र नः[9] अनुरोधं[10] तर्कये। तद् वरमितो मध्यमलोकसान्निध्येन[11][12] गन्तुम्॥

विभी०। देव।

एते ते सुरसिन्धुधौतदृषदः कर्पूरखण्डोज्ज्वलाः
पादा जर्जरभूर्जवल्कलभृतो[13] गौरीगुरोः पावनाः।

---

[1] °ज्जनतैक° B, E, K °ज्जननैक° Sc °ज्जनैक° in the text and न by rev along margin, W °ज्जननैक° $I_2$

[2] जन्मा° E, K, B, W जन्या° Sc, $I_2$

[3] °धर्म° B, E, K °कर्म° W, Sc °च्चर्म° $I_2$

[4] तत्रैव om. B only.

[5] °गृह° for °ग्रह° E only.

[6] विहायः B विहाय cett.

[7] श्लोक W श्लोकः cett.

[8] Om. one प्रियं K only

[9] नः E, K, $I_2$ न W, Sc नः छन्दचारिणां वैमानिकानां B.

[10] °रोधं B, K, W, Sc °रोधे E °रोध $I_2$

[11] मध्य° for मध्यम° E only.

[12] °सान्निध्यं गंमन प्रस्तुतमनुसन्धातुं B °सान्निध्येन गन्तुं cett

[13] °भृतो B, E, K, Sc, $I_2$ °धृतो changed to °वतो by rev., W.

तत्त्वालोकनिरस्तमोहतमसामध्यात्मविद्याजुषां
यच्च ब्रह्मविदां निसर्गमधुरं[1] जागर्ति सौम्यं महः ॥ २७ ॥

लक्ष्म०। आर्य कथमेते [2]भुवां परिसराः संस्तुतपूर्वा[2a] इवान्यविषयग्राहित्वं न क्षमन्ते चक्षुषोः ॥

रामः। निरूप्य। सञ्चरणाविगम्। वत्स ता एवैता गुरूणां कौशिकपादानां सञ्चरणेन पविचितपर्यन्तास्तपोवन[3]भूमयः। यच्च तु तत्रभवतो[4] याज्ञवल्क्यान्तेवासिनो द्वितीयेन विदेहाधिपतिना सह[5] तत्[6] तत् संलापामृतप्रमोदमनुभवतां[7] गुरूणां लालनीयाभ्यामावाभ्यां बाल्योचितमुल्ललितम् ॥

सीता। स्वगतम्[9]। कणिट्ठतादो[10] त्ति[11] सुणीअदि[12] ॥ इति परितः सस्पृहमालोकते[13] ॥

रामः। लङ्केश्वर नोचितमिदानीं गुरुचरणपङ्कजरजः[14]पविचितेषु परिसरेषु[15] विमानाधिरोहणम् ॥

नेपथ्ये। भो भो[16] रामलक्ष्मणौ। स भगवान् कृशाश्वान्तेवासी वां समाज्ञापयति ॥

उभौ। विमानाधिदेवतामिङ्गितेन[17] संस्तभ्य नियुज्य। अवहितौ स्वः[18] ॥

---

[1] °विधं for °मधुर E only

[2] 'Himalaya' added by rev. along margin, W.

[2a] °पूर्वा इवान्य° B °पूर्वान्य° cett

[3] Adds 'Tapovana' along margin, W

[4] °भवतो B, E, K °भवता W, Sc, $I_2$

[5] सह om. B only

[6] Om. one तत् E, W, Sc only.

[7] °भवता B °भवतां cett.

[8] लालनीयाभ्याम् om. E only.

[9] कहं add. E, W, Sc, $I_2$ only.

[10] तादो add. E only

[11] त्ति B, K, $I_2$ ति E, W, Sc.

[12] सुणीयदि B सुणीअदि cett

[13] °लोकते B, E, K, $I_2$ °लोक्यते corr to °लोकते W °लोक्यते Sc.

[14] रजः om. W, Sc, $I_2$ only

[15] परिसरेषु om. E only.

[16] भो E भोः cett.

[17] संस्तभ्य B, E स्तभ्य cett.

[18] स्वः B, E, K, Sc, $I_2$ स्तः W. Appears to take अवहितौ स्तः as a part of stage-direction, for, unlike all other MSS joins नियुज्य and अवहितौ in Sandhi and reads नियुज्यावहितौ W.

पुनर्नेपथ्ये।

पुरीं यथास्थितौ यातं विलम्बेथां[1] च[2] मान्तरा।
अरुन्धतीसहचरं[3] ज्योतिर्वा[4] सम्प्रतीक्षते ॥२८॥

अहमपि तृतीयकालक्रियानुसन्धानपरवान् मुहूर्तद्वयेनागत एव ॥

उभौ। यथाज्ञापयन्ति गुरवः ॥ पुनर्विमानं सम्प्रतिष्ठेते[5] ॥

रामः। अहो महात्मानोऽपि वात्सल्यपरतन्त्राः[6]। यन्महिम्ना तपःस्वाध्याययोर्लवशो विभक्ते[7] समये[8] तत्रापागमनमनुरुध्यन्ते[9]। अथवा युक्तमेवैतत्। यतः करुणापारतन्त्र्येण मृदुस्वभावास्ते तपोवनरूरुषु[10] तरुषु च किं मनुष्येषु। विशेषतस्तु[11]

राज्ञां[12] मार्तण्डवंश्यानां गृहे नौ जन्म केवलम्।
शस्त्रास्त्रज्ञानमुख्यस्तु संस्कारोऽस्मान्महात्मनः ॥२९॥

इतरे। यथाह रामभद्रः ॥

विभी०। विलोक्य[13]। किमिदमकाण्ड एव नीहारजालैरिव क्षमारजोभिराच्छाद्यन्ते ककुभः ॥ सर्वे सविस्मयं पश्यन्ति ॥

रामः। सवितर्कम्। मन्ये प्राभञ्जनेरस्मत्प्रवृत्तिमुपलभ्य मां प्रत्युद्यातीव[14] ससैन्यो भरतः ॥

---

[1] °म्बेथां B, K, Sc, $I_2$ °म्बेतां E, W

[2] च om. and reads मातरः for मान्तरा E.

[3] च add after °ती° before °सह° E only

[4] °र्वा B, K °र्मा E, W, Sc °र्मा $I_2$

[5] सम्प्रतिष्ठाते B प्रतिष्ठते cett.

[6] वात्सल्य° B, E, K, Sc, $I_2$ वात्सल्ये W

[7] विभक्त° E विभक्ते cett.

[8] काले B समये cett.

[9] °ध्यते W °ध्यन्ते cett.

[10] °रूरुषु B °गुरुषु E, W, Sc, $I_2$ °मृगेषु K.

[11] °षस्तु E, $I_2$ °षतस्तु cett.

[12] राज्ञा E राज्ञां cett.

[13] विलोक्य om. B only.

[14] प्रत्युद्यातीव B, K, $I_2$ प्रत्युपयातीव W प्रत्युपातीव Sc प्रत्युद्यावतीव E

प्रविश्य [1]हनूमान्। सपादपद्मजसगं प्रणम्य। देव।

स्थितो ध्यायन्नन्तः किमपि चरितं स्वेन भवत-
श्चिरं वार्तामेनामथ मदुपलभ्य प्रचलितः।
जटी चीरी रामेत्यमृतविभवं नाम रसयन्[4]
मुहुर्हर्षोद्भ्रान्तः प्रकृतिसहितोऽभ्येति भरतः ॥३०॥

रामः। सोल्लासम्। अहो चिरायायुष्मत्सौहार्दमुपलभामह इति सर्वानन्दानामुपरि वर्तामहे ॥

लक्ष्म°। सौत्सुक्यम्। सखे मारुते कुचार्यः ॥

हनू°। य एते सैन्यस्य पुरतः पञ्चषास्तन्मध्ये पुरःसरः सानुजः स महात्मा भरतः ॥ लक्ष्मणो निर्वर्णयति ॥

सीता। निरूप्य। कहं [8]अण्णारिसो ज्जेव[9] दीसइ[10] ॥

विभी°। [11]हंहो विमानराज। चिराय[12] बन्धुजनदर्शनालिङ्गन-सम्भावनादिना मिथः[14] प्रमोदमनुभवन्त्वेते[15] महानुभावाः। तत् क्षणं विरम ॥ सर्वे विमानावतरणं नाटयन्ति ॥

---

[1] हनु° E हनू° cett.

[2] गाय° K ध्याय° cett.

[3] °मेता° K °मेना° cett

[4] °रचयन् K रसयन् cett.

[5] हर्षोद्भ्रान्तः B, K, Sc, $I_2$ हर्षोद्भ्रान्तः E हर्षोद्भ्रान्त changed to हर्षोद्भ्रान्त by 1ev, W.

[6] चिराय वपुष्मत्सौ° E, $I_2$ चिरायायुष्मत्सौ° W, Sc चिराय वपुष्मन् सौ° B चिरार्ययुष्मत्सौ° K.

[7] सर्वानान्दा° W सर्वानन्दा° cett.

[8] अण्णा° B, E, K अणा° Sc, $I_2$ अण्णा° W.

[9] जेव्व E, W ज्जेव्व cett

[10] दिसइ E दीसइ cett.

[11] अहो K हंहो cett.

[12] दीवाय orig., but struck out, B चिराय cett

[13] °जन° om E, K only.

[14] मिथः B, E, K मिथोऽङ्ग° W, Sc मिथा $I_2$ मिथा further on in the passage wrongly 1epeated, $I_2$.

[15] °भवन्त्वेते W °भवन्त्वेते cett.

[16] °नावरणं B °नावतरणं cett.

ततः प्रविशतः कतिचनप्रधानपुरुषपरिवृतौ भरतशत्रुघ्नौ ॥

रामः । सरभसं[1] पादपतितं भरतमुत्थाप्य[2] । एह्येहि वत्स ।

अनुभावयति ब्रह्मानन्दसाक्षात्क्रियामिव ।
स्पर्शस्ते[3] जठराम्भोज[4]प्रस्फुरन्नालकर्कशः ॥३१॥

इति निर्भरमालिङ्ग्य विसृजति । लक्ष्मणः सपादपतनं[5] भरतमालिङ्गति । शत्रुघ्नो रामलक्ष्मणावभिवादयति ॥

उभौ । कुलस्थितिमनुवर्त[6]स्व ॥ भरतशत्रुघ्नौ दण्डवत् सीतां प्रणमतः ॥

सीता । कुमारा[7] जेट्ठाणं भादुआणं अभिमदा होह[8] ॥

रामः । वत्सौ भरतशत्रुघ्नौ ।

अस्माकं व्यसनाम्भो[9]धावयं पोतत्वमागतः ।
कपीन्द्रोऽयं च लङ्केन्द्रो मित्रं[10] धर्महिते रतः ॥३२॥
तत् परिष्वज[11]तम् ॥ इति सुग्रीवविभीषणौ दर्शयति ॥

भरतशत्रुघ्नौ तौ परिष्वज्य मिथो[12] [13]यथोचितमुपचरतः ॥

भरतः । आर्य [14]कुलगुरुर्नो[15] भगवान् मैत्रावरुणिः सिंहासन-[15] गृहे[16] सम्पादितसकलाभिषेकसम्भारो भवन्तं प्रतीक्षते । [17]यथाज्ञापयत्वार्यः ॥

---

[1] सरभसं E, K, Sc, $I_2$ सरसं corr. to सरभसं W सरभसꣳ B.

[2] °मुत्थाप्य B °मुत्थापयति cett

[3] स्पर्शस्ते जठरा° B, E, K, $I_2$ स्पर्शस्तेऽद्य वरा° W, Sc.

[4] °म्भोजे E °म्भोज° cett.

[5] °वदनं E °पतनं cett

[6] °वर्णस्व W °वर्तस्व cett.

[7] कुमारा B, K, $I_2$ कुमारो E कुमार W, Sc.

[8] होह B, K होन्दु W, Sc होद E दोह $I_2$

[9] °नाम्बाधावयं पातत्वमागतः E नाम्भोधावितौ पोतत्वमागतौ K °नाम्भोधावयं पोतत्वमागतः cett.

[10] मित्र° B मित्रं cett.

[11] °जत E °जतं cett

[12] मिथो om. W only.

[13] यथो is a corr. fr. मिथो W

[14] कुल om. K only.

[15] °र्नौ B °र्नो K °र्नौ cett.

[16] °गृहे B, E, K °ग्रहे W, Sc °ग्रह $I_2$.

[17] यदा° B यथा° cett.

रामः। स्वगतम्। कौशिकपादाः प्रतीक्षणीयाः। स च भगवान्[1] मैचावरुणिरेवमाज्ञापयति। भवतु समयोचितं प्रतिकरिष्यते[2] ॥ प्रकाशम्[3]। यथाज्ञापयति कुलगुरुः ॥ सर्वे परिक्रामन्ति ॥

ततः प्रविशति [4]वसिष्ठो दशरथकलत्रैः[5] सह चर्यमाणारुन्धती च ॥

वसिष्ठः। स्वगतम्।

क्षमायाः [6]सुक्षेत्रं गुणमणिगणानामपि [7]खनिः
[8]प्रपन्नानां [9]मूर्तः सुकृतपरिपाको[10] जनिमताम्।
कृपारामो रामो बहिरिह दृशा[11] पास्यत इति
प्रमोदाद्वै तस्याप्युपरि परिवर्तामह इमे ॥ ३३ ॥

भवतु। तथापि लोकयाचानुवर्तनीया[12] ॥ प्रकाशम्। वध्वौ कौसल्यासुमित्रे[13] ॥

उभे। [14]आणवेदु कुलगुरू[15] ॥

वसि°। दिष्ट्याक्षतं[16]प्रतिनिवृत्तवत्से[17] स्थः[18] ॥

उभे। तुम्हाणं आसिसाणं पहावो[19] ॥

---

[1] भवान् B भगवान् cett.

[2] °करिष्ये E °करिष्यते cett.

[3] प्रकाशं om E only.

[4] वसि° K, W, $I_2$, B वशि° E, Sc

[5] °त्रैःसहचर्य° B °त्रै सपचर्य° K °त्रैरुपचर्य° cett.

[6] सु° B सत् K स° E, W, Sc, $I_2$.

[7] खनिः W खनिः cett.

[8] प्रयत्नानां E प्रसर्तानां K प्रपन्नानां cett.

[9] मूर्तिः K मूर्तः cett.

[10] °कोऽञ्जलिभृतां B °को जनिमतां cett

[11] दृशा पा° B, E, K दृशोपा° W, Sc दशापा° $I_2$

[12] लोकचया° E लोकयाचा° cett

[13] कोसल्या° E कौशल्या° cett.

[14] आणवेदु B, $I_2$ अणवेदु K आणवेदु cett.

[15] °गुरू B °गुरुः E °गुरु cett

[16] °क्षत° E, K, $I_2$ °क्षतं W, Sc °क्षत om. B.

[17] °वृत्तवत्से B, E, K, $I_2$ °वृत्तौ वत्सौ W, Sc

[18] स्तः E, W स्थः cett.

[19] आसिसाणं K, W, Sc, B असिसाणं E आसीसाणं $I_2$.

अरुन्धती । कैकेयीं विलोक्य । वत्से कैकेयि । किमेवमतिदुर्मनायसे ॥

कैकेयी । अम्ब[1] मह[2] मन्दभाइणीए अधंसदाए[3] सअलो वि [4]लोओ एवं कोलीणं भणदि[5] जं वच्छाणं[6] पवासजणणी मज्झूमजणणी[7] मन्थरामुहे[8] [9]आसि । ता कहं वच्छाणं[10] मए[11] [5]मुहं पेक्खिदव्वम् ॥

अरु० । वत्से अलं वृथा कौलीनशङ्कया । आर्यमिश्रैरयमर्थस्त[12]दैवान्तरेण[13] चक्षुषा साक्षात्[14]कृतः ॥

सर्वाः । कहं विअ ॥

अरु० । मन्थरारूपधारिण्या शूर्पणख्या[15] माल्यवद्वचनादेतद् वि-[10]हितमिति[16] ॥

सर्वाः । अहो रक्खसाणं दुट्ठत्ताभिओओ[17] जो [18]गिहट्ठिदं अवलाजणं[19] पि[19a] [20]वाधेदि ॥

---

[1] अम्ब om B only.

[2] मह *after* मन्दभाइणीए B मह *before*, cett.

[3] अधस० E, K, W अधण० B अर्धस्म० Sc, $I_2$

[4] लोओ om. B only

[5] भणदि om. B only.

[6] वत्साणे E वच्छाणं cett

[7] मज्जन० B मञ्ज्झम० E मरुम० K मन्नूम० W, Sc, $I_2$

[8] °मुहेण B °मुहे E, K, $I_2$ °मुहं W, Sc

[9] आसी E आसि cett

[10] वत्साणं W वेच्छाणं E वच्छाणं cett.

[11] मए *before* वच्छाणं B, *after*, K, W, Sc, $I_2$ मए om E

[12] °रयमेवार्थ० K °रयमर्थ० cett

[13] दैवान्तरेण add B only

[14] प्रत्यक्षीकृतः B साक्षात्कृतः cett.

[15] शूर्पण० W शूर्पन० E सूर्पण० cett

[16] विलसित० E विहित० cett.

[17] दुट्ठताभियोओ B, W दुट्ठताभिओओ K, Sc, $I_2$ दुट्ठदाभिओओ E.

[18] गिह० B, E, K दूह० W, Sc मिह० $I_2$

[19] °अणं E °जणं cett

[19a] वि all MSS.

[20] वाधदि E वाधेदि cett

वसि°। हुं मङ्गलसमये ऽलमलं यत्किञ्चिद्[1]दुक्तैः। का पुनरद्यापि राक्षसाभियोगवार्ता ॥

रामः। [2]वसिष्ठं विलोक्य। सोल्लासम्[3]। स[4] एष भगवान् मैत्रावरुणिः[5]।

यद्दर्शनात् किमप्येतद्[6] द्रवीभवति मे मनः।
[7]राकासुधाकरालोकादिन्दुकान्तोपलो[8] यथा ॥३४॥

लक्ष्मणं प्रति। वत्स इत इतः ॥

उभौ। उपसृत्य। भगवन् कुलगुरो। रामलक्ष्मणावभिवादयेते[9] ॥

वसि°।

चक्षुषां स्वस्वसमये संस्कारचयमाप्नुताम्[10]।
वत्सौ नयेन धर्मेण ज्ञानेन च पुरस्कृतम् ॥३५॥

उभावरुन्धतीमभिवन्देते[11] ॥

अरु°। इष्टैर्युज्येथाम् ॥

उभौ क्रमेण सर्वा [12]मातॄरभिवन्देते ॥

सर्वाः[13]। तौ निर्भरं परिष्वज्य मूर्ध्नुपाघ्राय। जं अम्हे [14]चिन्तेमो तं तुम्हाणं [15]होदु ॥

सीता उपसृत्य [15]वसिष्ठं प्रणमति ॥

वसि°। वत्से वीरप्रसविनी भव ॥

सीतारुन्धतीं प्रणमति ॥

---

[1] °दुक्तैः B, E, K, $I_2$ °दुःखकैः W °दुःखकैः Sc.
[2] वशि° E वसि° cett.
[3] सोल्लासम् om. here, B only.
[4] स om. E only.
[5] सोल्लासम् add. here, B only.
[6] °तद्द्रवी° E, $I_2$ °तद्द्रवी° B, K, Sc °तद्द्रवी° W
[7] एकात् for राका° E only.
[8] °पला W °पलो cett.
[9] °वादयेते B, K °वादयते E °वादयेति $I_2$ °वादयावह इति W, Sc.
[10] °चयमाप्नुता K °चयमश्नुतां B °लं समाप्नुतां E, W, Sc, $I_2$
[11] °वादेते E °वन्देते cett.
[12] मातरोभिवन्ते for मातॄरभिवन्देते E
[13] ताः add B only. [only.
[14] चिसोतं B चिन्तोमो Sc चिन्तेमो cett
[15] वशि° Sc, $I_2$ वसि° cett.

अरु°। सीतां निर्भरमालिङ्ग्य[1]।

लोपामुद्रानुसूयाहमिति तिस्रस्त्वया सह।
पतिव्रताश्चतस्रोऽत्र सन्तु जानकि साम्प्रतम् ॥३६॥

सीता[2] श्वश्रूरभिवन्दते ॥

सर्वाः। जादे[3] कुलपडिट्ठावअदारअप्पसविणी होहि[5] ॥

नेपथ्ये।

[6]प्रवर्तन्तां पौराः प्रतिसदनमद्योत्सवविधौ[7]
चिरं स्वे स्वे कर्मण्यथ समवधत्ताप्यधिकृताः[8]।
यथोक्तं सम्भारं पुनरिह विधत्त[9] द्विजवराः
कृशाश्वान्तेवासी कुशिकपतिराज्ञापयति वः[10] ॥३७॥

वसि°। आकर्ण्य। अहो[11] भाग्यमहिमा वत्सस्य यद् भगवान् कौशिकः स्वयं सिंहासने समभिषेक्तुं सम्प्राप्तः ॥

इतरे। प्रियं[12] प्रियं नः ॥

ततः प्रविशति सशिष्यो विश्वामित्रः ॥

विश्वामित्रः।

[13]सत्रप्रत्यूहशान्त्यै दशरथकरतः[14] कर्षतैनं मया[15] यद्
[16]यत्स्वान्ते संविमृष्टं तदनुगुणविधौ[17] यच्च वैयग्र्यमासीत्[18]।

---

[1] Folio 28 beginning with ग्य। लोपा- मुद्रा° (line 1-2 above) and ending with °मेतावनुभूतोत्सवप्र (page 213, l. 11) miss- ing, B.
[2] सीता om E only
[3] जदि corr. to जाद् W जादे cett
[4] °पडिट्ठावअ° K, $I_2$ पडिट्ठाङ्कअ Sc पडिटावअ E पडिट्ठाकअ W
[5] होहि W, Sc, $I_2$ होद् K होही E.
[6] प्रवर्त्तन्तां K प्रवर्त्ततां E प्रवर्तन्तां W, Sc प्रकर्यतां $I_2$
[7] °विधौ चिरं W, Sc विधिश्चिरं cett.
[8] °क्षताः E, K °क्षतः cett.
[9] °धत्ता E °धत्त cett
[10] नः E वः cett
[11] अयं add. W, Sc only
[12] प्रिय प्रियं K प्रियं cett.
[13] शुचु° K सच° cett.
[14] °कतरः W °करतः cett.
[15] मयाच K मया यद् cett
[16] यद्यत्स्वान्ते वि° K यत्स्वान्ते ते वि° $I_2$ यत्स्वान्ते संविमृष्टं W, Sc यत्स्वां वेतें तं वि° E.
[17] °विधो $I_2$ °विधौ cett
[18] वयग्न्य° E वैयग्र्य° cett.

तद्दैवस्यानुगुण्यात् प्रयतनविभवैश्चाद्य [2]राज्येऽभिषिच्य
श्रीरामं [3]निर्वृ[4]तानां फलितमिति मुहुः सम्प्रमोदामहे
ऽन्तः [5]॥३८॥

इति परिक्रामति ॥

5 वसि°। स एष कौशिकः।

क्षात्रं प्राकृ[6]तिकं तेजो ब्राह्मं यस्य विशिष्यते।
लोकोत्तरचमत्कारनि[7]धेस्तस्याद्भुतं न[8] किम् ॥३९॥

[9]वसिष्ठविश्वामित्रावुपसृत्यान्योन्यमुपचरतः ॥

विश्वा°। [10]भगवन् मैत्रावरुणे किमद्यापि प्रतीक्ष्यते ॥

10 वसि°। यथोचितमादि्रयताम् ॥

[11]विश्वा°। दिव्यर्षिगणमुद्दिश्य। निर्वर्त्यतां रामभद्रस्याभिषेकः ॥ मुनयः यथोचितमाचरन्ति। नेपथ्ये दुन्दुभिध्वनिः। [12]सर्वे सविस्मय[13]मा[11]कर्णयन्ति ॥

पुनर्नेपथ्ये।

नृत्य[13a]न्त्वप्सरसो मेघैः सिच्यतां मेदिनी[14]तलम्।
15 वितरन्त्वच पुष्पाणां वर्षं कल्पद्रुमाः स्वयम् ॥४०॥

सर्वे सविस्मयं पुष्पवृष्टिं [16]निरूपयन्ति ॥

---

[1] तद्दैवस्यानुगुण्या° E, K, W, Sc ते देवस्या च गुण्या° $I_2$.

[2] राज्याभि° E राज्येऽभि° cett.

[3] °राम E, $I_2$ °रामं cett.

[4] निर्वृता° K, W, Sc निवृता° E निवृत्ता° $I_2$.

[5] सम्प्रमोदामहे न्नः K सम्प्रमोदामहे तः E सम्प्रमोदामहे त्तः $I_2$ सम्प्रमोदामहे नः W, Sc.

[6] प्राक्षतिकं K, W, Sc प्राक्षतकं E प्रक्षतिक $I_2$.

[7] °विधे E °निधे cett.

[8] नु $I_2$ न cett.

[9] वसि° K, W वशि° E, Sc, $I_2$

[10] °वान् Sc °वन् cett.

[11] विश्वा° om. E only.

[12] सर्वे सविस्मय° . . . स्वयं (l 15 below) om. W, Sc, $I_2$

[13] °विस्मयमाक° K °विस्मयकामाक° E.

[13a] नृत्यन्त्य° K, E.

[14] °तलं K तत्कं E.

[15] निरूप° E, K रूप° W, Sc, $I_2$

[16] पुष्पा° K पुष्या° E

वसि°। कथं सलोकपालो भगवान् पाकशासनो रामभद्रस्याभिषेकमनुमोदते ॥

कृताभिषेकमङ्गलो रामः। [1]वसिष्ठविश्वामित्रावुपसृत्य। गुरू अभिवादये ॥

उभौ।

रामभद्र[2] गुणाराम भ्रातृभिस्त्वं पुरस्कृतः।
इक्ष्वाकुमुख्यैर्भूपालैश्चिरमूढां धुरं वह ॥४१॥

इतरे। तथास्तु ॥ इत्यनुमोदन्ते ॥

विश्वा°। वत्स रामभद्र ॥

रामः। आज्ञापयन्तु गुरवः ॥

विश्वा°।

विसृज्येतामेतावनुभूतोत्सवप्रमोदौ[4] सुग्रीवविभीषणौ।
पुष्पकं च सङ्कल्पसमयसुलभं राजराजमेवाश्रयताम् ॥

रामस्तथा करोति ॥

विश्वा°। वत्स रामभद्र।

निर्व्यूढं[5] गुरुशासनं गुरुतरं धर्मोऽपि संरक्षितो
रक्षःसंहरणाच्चिकित्सितमनोरोगा चिलोकी कृता।
सिद्धार्थाश्च सुराः सहानुजसुहृद्वारेण[6] राज्यं पुनर्लब्धं किं करणीयमेतदधिकं श्रेयस्तदप्युच्यताम् ॥४२॥

---

[1] वसि° K, W, Sc वशि° E, $I_2$

[2] °भद्र K, W, Sc °भद्रं E °रुद्र $I_2$

[3] °रुज्यता° E °रुज्यन्ता° K, $I_2$ °रुज्येता° W, Sc.

[4] Folio 29 begins with मोदौ B

